बहिःशालामण्डपस्य चतुर्षु कोणेष्वामपात्रमृत्तिकानिर्मितप्रदीपान् स्थापयेत् । तान् घृतपूर्णानुज्ज्वलज्वलितैर्दीप्तान् कृत्वा । अथ दीपाधारमस्तके पूर्वादिक्रमेणाविच्छिन्नैः सूत्रैः सप्तावृतं वेष्टयेत् । केचित् त्रिवृतं वा ।

---

10.4–11.1 ००० समाप्तः । श्रीनृसिंहं ०००] $Gu_1$ misplaces between the colophon of the preceding and the beginning of the present chapter the following words (see below, p. 19): उदत्कोटिनिभं देवं नृसिंहं भक्तवत्सलं । नत्वा वाक्कायमनसैर्विधिं वक्ष्ये धिवासनं ॥ ततो ज्योतिर्विदां सम्मतेर्दिवसे विवाहादिकर्म्मणा यथाकथं सम्भारान्निष्पाद्य ॥ बहिःशालामण्डपं गत्वा ॥ ० ॥
1 ०प्रदर्शनम्] $NiKuGu_1$, प्रदर्शन $Gu_2$
2 वरणस्य] $KuGu_1Gu_2$, वरस्य Ni
2 ०कर्म च] Ni, ०कर्मणी Ku, ०कर्म्मणि $Gu_1$, कर्मणि $Gu_2$
3 ०विधिं वक्ष्यामः] NiKu, ०विधिः $Gu_1$ (see below, p. 13), ०विधि वक्षामः $Gu_2$
4 ०मण्डपस्य चतुर्षु] $NiKuGu_1$, ०मण्डपच+तु+र्षु $Gu_2$
4 ०पात्रमृत्तिकानिर्मितप्रदीपान्] $NiGu_2$, ०पात्रनिर्मितमृत्तिकादिप्रदीपान् Ku, ०पात्रमृत्तिकानिर्म्मितप्रदीपान $Gu_1$
4–5 तान् घृतपूर्णानुज्ज्वलज्वलितैर्दीप्तान्] em., तान् घृतपूर्ण्णानुज्वलज्वलितैर्दीपान् Ni, तान् घृतपूर्ण्णान् ज्वलितैर्दिपान् Ku, तानमृतपूर्ण्णं उज्ज्वलज्वलितैः $Gu_1$, तानु घृतपुर्ण्णानुज्ज्वलवर्त्तिभिः प्रज्वलितान्दीपान् $Gu_2$
5 कृत्वा] $NiKuGu_1$, कारयेत् $Gu_2$
5 अथ दीपाधारमस्तके] $NiKuGu_2$, तत्राधारमस्त्रके $Gu_1$
5 ०क्रमेणाविच्छिन्नैः] $Gu_1Gu_2$, ०क्रणाविच्छिन्नैः Ni, ०क्रमेणाविछिन्नै Ku
6 सूत्रैः] $NiKuGu_1$, om. $Gu_2$
6 सप्तावृतं] $NiKuGu_2$, स्तप्तवृतं $Gu_1$
6 केचित् त्रि०] corr., केचि त्रि० $NiKuGu_2$, केचिन्त्रि० $Gu_1$

मण्डपस्य पूर्वभागे धान्यपुञ्जोपरि जलकुम्भं स्थापयेत् । तदुपरि सहकारपल्लवं दत्त्वा । तदुपरि तण्डुलपात्रं नारिकेलफलं प्राङ्मौलिं प्रत्यङ्मूलं स्थापयित्वा । तस्य पश्चिमे आचार्यस्यासनं कल्पयेत् ।

ततः कुमारीमलंकारादिना यथाविभवानुसारेण मण्डयित्वा आचार्यस्योत्तरे पूर्वाभिमुखीमुपवेश्य । ततः कर्ता तामाचमनाभ्युक्षणं कारयित्वा । वरकन्ययोः पित्रयोः स्वी- Gu$_2$ 4v
कारवाचनं कृत्वा ।

अस्मदमुकशर्मणः पुत्रं युष्मद्दुहितरं देहि । स वदेदारोग्यमप्रवासी लग्नकाले चोप- Gu$_1$ 8r
स्थितं दातुमिति । ततः कर्ता मितादीन् पूजयेत् । तदनन्तरं कर्ता कन्यां हिरण्यवर्णेति सूक्तेन स्नापयित्वा । सुवर्णनारिकेलफलक्रमुकताम्बूलगन्धपुष्पशङ्खाभरणवस्त्राण्यानीय । कन्यायाः पुरतः स्थापयित्वा । यत्ते वास इत्यृचाभिमन्त्र्य वासो दत्त्वा । अपराणि सर्वाणि Ni 4r
कन्यायां दद्यादिति ।

---

8 हिरण्यवर्णाः PS 1.25 10 यत्ते वासः PS 16.4.6

---

1 °पुञ्जोपरि ] NiGu$_1$, °पुञ्जैपरि Ku, °पूञ्जोपरि Gu$_2$
1–2 तदुपरि °°° स्थापयित्वा ।] Gu$_2$ omits this sentence due to eyeskip
1 °पल्लवं ] NiKu, lac. Gu$_1$, °पलवं Gu$_2$
2 दत्त्वा ] corr., दत्वा NiKuGu$_2$, lac. Gu$_1$
2 तण्डुलपात्रं ] NiKu, lac. Gu$_1$, om. Gu$_2$
2 °फलं ] Ni, °फलतं Ku, lac. Gu$_1$, °फलं च Gu$_2$
2 प्राङ्मौलिं प्रत्यङ्मूलं ] corr., प्राङ्मौ प्रत्यङमुलां Ni, प्रान्मौलि प्रत्यङमुली Ku, lac. Gu$_1$, प्राङ्मोलि प्रत्यङ्मूलं Gu$_2$
3 आचार्यस्यासनं ] NiKu, आचार्यासनं Gu$_1$, आचार्यस्यसनं Gu$_2$
3 कल्पयेत् ] NiGu$_1$Gu$_2$, कल्पयित्वा Ku
4 ततः ] NiKuGu$_2$, om. Gu$_1$
4 °कारादिना ] em., °कारादिनां NiKuGu$_1$, °कारादि Gu$_2$
4 °विभवानुसारेण ] Gu$_1$, °विभर्वानुसारेण Ni, °विभदानुसारेण Ku, °+शक्त्य+नुशारेण Gu$_2$
4 °स्योत्तरे ] NiKuGu$_1$, °स्य उत्तरे Gu$_2$
5 °मुपवेश्य ] NiKuGu$_1$, °मुपविश्य Gu$_2$
5 ततः ] NiKuGu$_2$, om. Gu$_1$
5 कारयित्वा ] corr., कृत्वा NiKuGu$_2$, ककारयित्वा Gu$_1$
5 पित्रयोः ] NiGu$_1$, पित्र्योः Ku, पित्रोः Gu$_2$
6 °वाचनं ] KuGu$_1$, वाचन Ni, °वचनं Gu$_2$
7 अस्मदमुक° ] Gu$_1$, अस्मत् अमुक° NiKu, अमुकशर्मन्न अमुक° Gu$_2$
7 °द्दुहितरं ] NiKu, °दुहितरं Gu$_1$Gu$_2$
7 स वदेदा° ] corr., सोऽवदत् आ° NiKu, सोऽवददा° Gu$_1$, स वदेत् आ° Gu$_2$
8 °स्थितं ] NiKuGu$_2$, °स्थितुं Gu$_1$
8 दातुमिति ।] NiKuGu$_2$, दातुं । Gu$_1$
8 ततः कर्ता मितादीन् ] NiKu, कर्त्ता मितादीन ततः Gu$_1$, ततः कर्ता मितादीन Gu$_2$
8 कर्ता ] corr., कर्त्ता NiKuGu$_2$, om. Gu$_1$
8 कन्यां ] NiGu$_1$, कन्या KuGu$_2$
8 हिरण्यवर्णेति ] NiKuGu$_2$, हिण्यवर्न्णेति Gu$_1$
9 सूक्तेन ] NiKuGu$_2$, मन्त्रेण Gu$_1$
10 पुरतः ] NiKuGu$_2$, पुरः Gu$_1$
10 इत्यृचाभिमन्त्र्य ] NiKuGu$_2$, त्यृचाभिन्त्र्यय Gu$_1$
10 दत्त्वा ] corr., दत्वा NiKuGu$_1$Gu$_2$
10 अपराणि ] NiKuGu$_2$, एतानि Gu$_1$
10 सर्वाणि ] NiGu$_1$Gu$_2$, om. Ku
11 कन्यायां ] NiKuGu$_1$, कन्याया Gu$_2$
11 दद्यादिति ] NiGu$_1$Gu$_2$, दद्यात् Ku

ततस्तां सुभगाः स्त्रियो गृहं नीत्वा वासादिना परिधाप्य । तस्या अञ्जलौ सफलं Ku 4r तण्डुलं पूरयित्वा । पुनर्मण्डपे आचार्यस्योत्तरतः प्रवेशयेत् । तत आचार्यस्तां गन्धपुष्पैः स्वस्वमन्त्रेण दद्यात् । ततो मङ्गलारोपणम् । अर्यमणमिति द्वाभ्यामाशिषदानम् ।

ततः सहस्राक्षेणेत्यृचा वरायाशिषं दातुं स्थापयति । ततो रक्षां कृत्वा गृहं प्रवेशयेत् । ततः सुभगाः स्त्रियो मङ्गलान्याचरन्ति । इति कन्यादर्शनविधिः ।

अथ वरणविधिः । अहतवस्त्रयुगं गन्धमाल्यमुद्रिकाकुण्डलदूर्वाक्षतयज्ञोपवीतताम्बूल-Gu$_2$ 5r नारिकेलफलक्रमुकफलानि । एवं पयःपेटी । वरस्य पादप्रक्षालनार्थं शरावादिपात्रम् । एतानुपकल्प्य । ततः कन्यादाता वरमानेतुं शङ्खादिमङ्गलवाद्यपुरःसरं ब्राह्मणैः सह गत्वा । वराय गन्धमाल्यादिनाभ्यर्च्य । नारिकेलफलं हस्ते दत्त्वा पुनस्तेनैव प्रकारेण वरमानीयाचम्य कर्तुरुत्तरतः पूर्वाभिमुखमुपवेश्य । ततः कन्याभ्रातादयो मृत्तिकादिपात्रे वरस्य पादौ पयःपेटीजलेन जलेन च प्रक्षालयन्ति । ततः कन्यादाता वरस्य वरणाय

3 अर्यमणम् PS 18.2.7–8 4 सहस्राक्षेण PS 1.62.3

1 ततस्तां] NiKuGu$_1$, ततःस्तां Gu$_2$
1 सुभगाः] corr., सुभगा NiKuGu$_1$Gu$_2$
1 वासादिना] Ni, वस्त्रादिना Ku, वासादिनां Gu$_1$, वश्रादीन् Gu$_2$
1 °स्या अञ्ज°] em., °स्याञ्ज° NiKuGu$_1$Gu$_2$
1–2 °फलं तण्डुलं] NiKuGu$_2$, °फलतण्डुलं च Gu$_1$
2 आचार्यस्तां] NiKuGu$_1$, आचार्यस्तस्यै Gu$_2$
2 °पुष्पैः] NiKuGu$_1$, °पुष्पं Gu$_2$
3 °रोपणम् । अर्यमणमिति] Between these two sentences, Ni and Ku insert with minor variants the verse भूमिं दीपं etc., that occurs in all mss. in ch. 3, p. 46
3 °माशिष°] NiKuGu$_1$, °माशिस° Gu$_2$
4 ततः] NiKuGu$_2$, तत Gu$_1$
4 सहस्राक्षेणेत्यृचा] NiKuGu$_1$, शहश्राक्षेणेत्यृच Gu$_2$
4 स्थापयति] NiGu$_1$Gu$_2$, स्थापयेत् Ku
5 ततः] NiKu, om. Gu$_1$, ततो Gu$_2$
5 सुभगाः] corr., सुभगा NiKuGu$_1$Gu$_2$
5 °विधिः] NiKuGu$_2$, °विधिः +sec. m. इतीकनादर+ Gu$_1$
6 वरणविधिः] NiKu, वरणविधिं वक्ष्यामः Gu$_1$ (see above, p. 11), वरणविधि Gu$_2$
6 अहतवस्त्रयुगं] Ku, {अथ}अहतवस्त्रयुगं Ni, अहतवस्त्रं युगं Gu$_1$, अहतवश्रयुग्मं Gu$_2$
6 °माल्यमुद्रिका°] NiKuGu$_1$, °माल्यामुद्रिकान् Gu$_2$
7 °नारिकेलफलक्रमुकफलानि] NiKu, °नारिकेलक्रमुकफलानि Gu$_1$, °नारिकेलफलनारिकेलफलक्रमुकफलनि Gu$_2$
7 एवं पयःपेटी] Ku, एकं पयःपेटी Ni, om. Gu$_1$, एका पयपेटी Gu$_2$
8 वरमानेतुं] corr., वरानेतुं NiKuGu$_1$, वरमानेतु Gu$_2$
9 वराय] NiKuGu$_1$, वरं Gu$_2$
9 °दिनाभ्यर्च्य] corr., °दीनभ्यर्चं NiGu$_1$, °दीनभच्चर्य Ku, °दिनाभ्यच्चर्य Gu$_2$
9 दत्त्वा] corr., दत्वा NiKuGu$_1$, हत्वा Gu$_2$
10 वरमानीयाचम्य] NiKuGu$_1$, वरमानयेत् ॥ वर आचम्य Gu$_2$
10 कर्तुरुत्तरतः] NiGu$_2$, कर्तुरुत्ततः KuGu$_1$
10 पूर्वाभिमुखमुपवेश्य] Gu$_1$, पूर्वामुखोप° Ni, पूर्वाभिमुखीमुप° Ku, पूर्वाभिमुख उपवेशेत् Gu$_2$
10 कन्याभ्रातादयो] Gu$_2$, कन्याभ्रातादयः NiKuGu$_1$
10 मृत्तिकादि°] Gu$_1$, मुर्त्तिकादि° NiKu, मृर्तिकादि° Gu$_2$
11 पयःपेटीजलेन] NiKu, पयःपेटियलेन Gu$_1$, पयपेटीजलेन Gu$_2$
11 जलेन च] NiGu$_2$, om. Ku, यलेन च Gu$_1$
11 प्रक्षालयन्ति] em., प्रक्षालयति NiKuGu$_1$, प्रक्षालयेत् Gu$_2$
11 कन्यादाता व°] NiGu$_2$, कन्यादातुं व° Ku, कन्यादातुर्व° Gu$_1$
11 वरणाय] NiKuGu$_1$, वरणार्थं Gu$_2$

ब्राह्मणान् प्रार्थयेत् । ते शुभमस्त्विति वदन्ति ।
अथ सङ्कल्पः । Ni 4v

ॐ विष्णुर्विष्णुर्विष्णुः ।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
स्मृते सकलकल्याणभाजनं यत्र जायते । Ku 4v
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥
शङ्खचक्रगदापाणे द्वारकानिलयाच्युत ।
गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागतम् ॥

अद्य ब्रह्मणो द्वितीयपरार्धे श्वेतवाराहकल्पे वैवस्वतमनोरष्टाविंशतितमे चतुर्युग- Gu$_1$ 9r
स्य कलेः प्रथमपादे । एकनवत्यधिकषट्शतोत्तरचतुःसहस्रपरिमितेऽब्दे । यथानामसं-
वत्सरे । अमुकायने । अमुक ऋतौ । अमुके मासि । अमुकपक्षे । अमुकतिथौ । अमुक- Gu$_2$ 5v
नक्षत्रे । अमुकराशिस्थिते श्रीभास्करे । अमुकराशिस्थिते श्रीचन्द्रमसि । एवं यथास्थाना-

---

4–5 The same verse is found in at the beginning of several *parvan*s of the Mahābhārata, although always relegated to the apparatus in the critical edition. It is also found elsewhere.

6–7 The same verse is found in as Viṣṇupurāṇa 5.17.17 and in the critical edition of the Mahābhārata, under 2.72.36*630.

8–9 The same verse is found in the crit. ed. of the Mahābhārata, under 2.61.40*547.

---

1 ब्राह्मणान्] ब्राह्मणा{या}न् Ni, ब्राह्मणान KuGu$_1$, ब्राह्मणाय Gu$_2$
1 शुभमस्त्विति वदन्ति] NiKuGu$_1$, शुभमस्तु वदेयुः Gu$_2$
2 अथ] NiKu, ततः Gu$_1$
4 विष्णुं] KuGu$_2$, विष्णुः NiGu$_1$
4 चतुर्भुजम्] NiKuGu$_2$, चतुभुजं Gu$_1$
5 प्रसन्न°] NiKuGu$_1$, प्रमन° Gu$_2$
6 स्मृते °°° जायते ।] This whole hemistich is omitted in Gu$_2$
8 द्वारका°] NiKuGu$_1$, द्वारिका° Gu$_2$
9 शरणागतम् ॥] KuGu$_1$, शरणागतम् ॥ ॐ विष्णुर्विष्णुर्विष्णुः । Ni, शरणाङ्गतं ॥ Gu$_2$
10 श्वेत°] NiKuGu$_2$, श्वत° Gu$_1$
10 वैवस्वतमनोर°] NiKuGu$_1$, वैवश्वतमनेर° Gu$_2$
10 °विंशतितमे] em., °विंशतितमः NiKuGu$_1$, °विंशतितम Gu$_2$
10–11 चतुर्युगस्य] NiKuGu$_2$, चतुयुगस्य Gu$_1$
11 कलेः प्रथमपादे ।] NiGu$_1$, कले प्रथमपादे ॥ Ku, कले ॥ प्रथमे पादे ॥ Gu$_2$
11 एकनवत्यधिकषट्°] NiKu, अमुकाधिकसप्तषण्णवत्यधिकषट° Gu$_1$, एकानवत्यधिकषट्° Gu$_2$
11 ऽब्दे] NiGu$_1$, ऽद्बे Ku, अऽब्दे Gu$_2$
12 अमुक ऋतौ] Ni, अमुका ऋर्त्तौ Ku, अमुकाकर्त्तौ Gu$_1$, अमुकतिथौ Gu$_2^{ac}$, अमुकर्त्तौ Gu$_2^{pc}$
12 अमुके मासि] NiKuGu$_2$, अमुकमास्य Gu$_1$
12–13 °तिथौ । अमुक°] Between these two items, only Ni includes अमुकवासरे
13 अमुकराशिस्थिते] NiKu, अमुकस्थिते Gu$_1$, अमुकरासौ स्थिते Gu$_2$
13 अमुकराशिस्थिते श्रीचन्द्रमसि] corr., अमुकराशिस्थिते श्रीचान्द्रमसि NiKuGu$_1$, अमुकरासौ स्थिते श्रीचन्द्रमसि Gu$_2$

वस्थितेषु भौमादिग्रहयोगलग्नकरणमुहूर्तकांशकेषु । एवंगुणविशेषणविशिष्टायां पुण्याहः-पुण्यतिथौ । इह पृथिव्यां जम्बुद्वीपे भरतखण्डे । भारते वर्षे । उत्कले देशे । मेरोर्दक्षिणतः । महोदधेरुत्तरतः । श्रीविरजापुरुषोत्तमयोरन्तराले । श्रीदेवब्राह्मणचरणसंनिधौ । अमुक-सगोत्रोऽमुकदेवशर्मा कन्यादानकर्माहं कुर्वीय । इति सङ्कल्पः ।

श्रीभगवतो वासुदेवस्य प्रीतये ब्राह्मणाय आसनं ददामि । ब्राह्मणाय पादासनं
Ni 5r ददामि । ब्राह्मणाय अर्घ्योदकं ददामि । ब्राह्मणाय गन्धं ददामि । ब्राह्मणाय पुष्पं ददामि । ब्राह्मणाय अर्चनीयं ददामि । ब्राह्मणं नारायणमुपकल्पयामि । अर्चितं स्वर्चितमस्तु ।

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

---

8–9 The same verse is found in the critical edition of the Mahābhārata, under 13.135.142d*635.

10–11 The same verse is found in the Viṣṇupurāṇa 1.19.65, the Nārada-purāṇa 1.4.61, and in the crit. ed. of the Mahābhārata, under 2.47.60b*93 and 13.135.142d*639.

---

1 °करण°] $KuGu_1Gu_2$, om. Ni
1–2 एवंगुणविशेषणविशिष्टायां पुण्याहःपुण्यतिथौ ।] NiKu, om. $Gu_1$, एवंगुणविशेषणविशिष्टायां पुण्यतिथौ । $Gu_2$
2 जम्बुद्वीपे] $KuGu_1Gu_2$, जम्बुदीपे Ni
2 भरतखण्डे] $NiGu_1Gu_2$, उत्तर+त+खण्डे Ku
2 भारते वर्षे] Ku, भारते व{त्त}र्षे Ni, भारते व{रसे}र्षे $Gu_1$, भारथे वर्षे $Gu_2$
3 महोदधेरुत्तरतः] Ni, महोदधिऋत्तरतः $KuGu_1$, महोदधिऋत्तरत $Gu_2$
3 °पुरुषोत्तमयोरन्तराले । श्रीदेव°] $NiGu_2$, °पुरुषोत्तमयोरन्तराले । अमुकनदीतीरे । श्रीअमुकदेव° Ku, पुरुषोत्तमयोरन्तराले । श्रीअमुकदेव° $Gu_1$
4 °सगोत्रोऽमुकदेवशर्मा] corr., °सगोत्र अमुकदेवशर्म्मा Ni, °सगोत्र अमुकदेवशर्मा Ku, °सगोत्र अमुकसर्मा $Gu_1$, °शगो{त्र}त्रोऽमुकशर्मा $Gu_2$
4 कन्यादानकर्माहं] $KuGu_1$, कन्यादानकर्म्माहं Ni, कन्यादानमहं $Gu_2$
5 ददामि] $NiGu_1Gu_2$, ददानि Ku
6 ददामि] $NiGu_1Gu_2$, ददानि Ku
6 ब्राह्मणाय अर्घ्योदकं] $NiKuGu_1$, ब्राह्मणयऽघ्योदकं $Gu_2$
6 ददामि] $Gu_1Gu_2$, ददा{स}मि Ni, ददानि Ku
7 अर्चनीयं ददामि ।] $NiKuGu_1$, om. $Gu_2$. $Gu_1$ reads in the margin, with (misplaced) indication to insert after this punctuation: +नमो स्त्वनन्ताया पाठेत् २+ See just below
7 ब्राह्मणं] NiKu, ब्राह्मण $Gu_1Gu_2$
8–11 नमो °°° नमो नमः ॥] $Gu_1$ omits all but the first words of these verses; even these few words are inserted in the wrong place (see just above)
8 नमो] $NiGu_1Gu_2$, ॐ नमो Ku
8 °पादाक्षि°] $KuGu_2$, °पादाक्ष° Ni, lac. $Gu_1$
9 °युगधारिणे] $NiGu_2$, युवधारिणे° Ku, lac. $Gu_1$
10 ब्रह्मण्य°] NiKu, lac. $Gu_1$, ब्रह्मन्य° $Gu_2$

ततः कुण्डलमुद्रिकानारिकेलफलक्रमुकफलताम्बूलगन्धपुष्पयज्ञोपवीतसहितं वस्त्र- Gu$_2$ 6r
युगं गृहीत्वा । कन्यादाता वदति । अमुकसगोत्रं अथर्ववेदान्तर्गतपिप्पलादशाखैकदेशा- Gu$_1$ 9v
ध्यायिनं अमुकदेवशर्माणं ब्राह्मणं गन्धपुष्पाद्यर्चितम् । अमुकसगोत्रस्यामुकशर्मणो मम
दुहितरममुकादेवीं कन्यां विवाहयितुमनेन वासोयुगलेन कुण्डलमुद्रिकादिसहितेन वर-
त्वेन त्वामहं वृणे । इत्युक्त्वा तद्वस्त्रादिकं वरस्य हस्ते दद्यात् । स च वृतोऽस्मीति
प्रतिवचनं ददाति । तद्वस्त्रयुगं समन्त्रकं परिधाप्य । गन्धपुष्पं गृहीत्वा पूर्वकृताशिषं
गृह्णाति । ततो ब्राह्मणानामर्घ्यदानम् । ततो मङ्गलारोपणम् । इहैव स्तमित्यृचा वराया-
शिषं दत्त्वा । इति वरणविधिः ।

अथ वाग्दानविधिः । गन्धपुष्पाक्षतफलजलतिलकुशसहितं शङ्खादिपात्रे गृहीत्वा
वाक्यं वदेद्दाता । ॐ विष्णुर्विष्णुर्विष्णुः । अद्य इहेत्यादिविशिष्टभूप्रदेशे अमुकमासि । Ni 5v
अमुकपक्षे । अमुकवासरे । अमुकतिथौ । अमुकनक्षत्रे । अमुकराशिस्थिते श्रीभास्करे । Ku 5v

---

7 इहैव स्तम् PS 18.3.1

---

1 कुण्डलमुद्रिकानारि॰] NiKuGu$_1$, कण्डलमुद्रिकां नारि॰ Gu$_2$
1–2 ॰यज्ञोपवीतसहितं वस्त्रयुगं] corr., ॰यज्ञोपवीतं वस्त्रयुगं NiKuGu$_1$, ॰यज्ञेपवितसहितं वश्रयुग्मं Gu$_2$
2 ॰गोत्रं] NiKuGu$_1$, गोत्र॰ Gu$_2$
2 ॰पिप्पलाद॰] NiKuGu$_1$, ॰पिपलाद॰ Gu$_2$
3 ॰ध्यायिनं] NiKuGu$_1$, ॰ध्यायिन Gu$_2$
3 ॰शर्माणं] NiKu, ॰शर्म्माणं Gu$_1$
3 ॰गोत्रस्यामुकशर्मणो] corr., ॰गोत्रं अमुकशर्म्मणो Ni, ॰गोत्रंस्य अमुकशर्मणो Ku, ॰गोत्रः अमुकशर्मणो Gu$_1$, ॰गोत्रस्याऽमुकशर्मण Gu$_2$
4 ॰मुकादेवीं] NiKuGu$_2$, ॰मुदेवीं Gu$_1$
4 विवाहयितुमनेन] NiKu, विवाहैतुमनेन Gu$_1$, विवाहयितुं अनेन Gu$_2$
4 वासोयुगलेन] corr., om. NiKuGu$_1$, वासोजुगलेन Gu$_2$
4 ॰मुद्रिकादि॰] Ni, ॰मुद्रिका॰ KuGu$_1$Gu$_2$
5 वरस्य हस्ते] NiKuGu$_2$, वरहस्ते Gu$_1$
5 स च] NiKuGu$_1$, वरो Gu$_2$
6 ददाति] NiKuGu$_1$, वदाति Gu$_2$
6 तद्वस्त्रयुगं] NiKu, तद्वस्त्रं युगं Gu$_1$, तद्वश्रयुग्मं Gu$_2$
6 ॰धाप्य] NiKuGu$_1$, ॰धापयेत् Gu$_2$
6 ॰पुष्पं] NiKuGu$_1$, ॰पुष्प Gu$_2$
6 गृहीत्वा पूर्वकृताशिषं] NiKuGu$_2$, गृहीत्वाशिषं Gu$_1$
7 गृह्णाति] NiGu$_1$, गृह्नाति Ku, गृह्णियात् Gu$_2$
7 ततो ब्रा॰] NiKuGu$_2$, ब्रा॰ Gu$_1$
7–8 इहैव ॰॰॰ दत्त्वा ।] This sentence is omitted in Gu$_2$ due to eye-skip
7 स्तमित्यृचा] Ni$^{pc}$Gu$_1$, स्तमित्यृचो Ni$^{ac}$, स्त्रमित्यृचा Ku, lac. Gu$_2$
7–8 वरायाशिषं] NiKu, वराय शिषं Gu$_1$, lac. Gu$_2$
8 ॰विधिः] NiKu, ॰विधि समाप्ता Gu$_1$, ॰वीधिः Gu$_2$
9 वाग्दानविधिः] NiKu, वाग्दानं Gu$_1$, वागदानविधि Gu$_2$
9 शङ्खादि॰] KuGu$_1$Gu$_2$, शङ्ख्यादि॰ Ni
9 ॰पात्रे] NiKuGu$_1$, ॰पात्रं Gu$_2$
10 वाक्यं] NiKuGu$_1$, वक्यं Gu$_2$
10 वदेद्दाता] NiKuGu$_1$, दाता वदेत् Gu$_2$
10 ॐ विष्णुर्विष्णुर्विष्णुः] NiKuGu$_2$, ॐ विष्णुः Gu$_1$
10 अद्य इहेत्यादि॰] Gu$_2$, अद्य इह Ni, अद्य इह पुण्ये हनि Ku, ऽद्य Gu$_1$
10 ॰विशिष्टभूप्रदेशे] NiKuGu$_2$, ॰विशिष्टभूमौ प्रदेशे Gu$_1$
10 अमुकमासि] Ku, अमुके मासि Ni, अमुकमास्य Gu$_1$, अमुके माशि Gu$_2$
11 अमुकवासरे] NiKuGu$_2$, ऽमुकवारे Gu$_1$
11 अमुकराशिस्थिते] Ku, अमुकराशिःस्थिते

अमुकराशिस्थिते श्रीचन्द्रमसि । एवं यथास्थानावस्थितेषु भौमादिग्रहयोगलग्नकरण-
मुहूर्तकांशकेषु । एवंविशेषणविशिष्टायां पुण्याहःपुण्यतिथौ । अमुकसगोत्रायाथर्ववेदा-
Gu$_{2}$ 6v न्तर्गतपिप्पलादशाखैकदेशाध्यायिने अमुकदेवशर्मणे ब्राह्मणाय चित्रादिरोगरहिताया-
क्लीबायापतितायाप्रवासिने यथाकालोपस्थायिने अमुकसगोत्र-अमुकशर्मा मम दुहित-
Gu$_{1}$ 10r रममुकसगोत्राममुकादेवीं कन्यां विवाहयितुं विवाहकाले ब्राह्मणसन्निधौ कर्तव्ये तदङ्ग-
तया गृह्योक्तविधिना तुभ्यमहं दास्यामि सत्यां सत्यां सत्यां वाचमहं प्रतिजाने । इत्युक्त्वा
भूमौ जलं निक्षिप्य कुशद्वयं वरस्य हस्ते दद्यात् । ब्राह्मणानामाशीर्वादः । ततो रक्षाकरण-
मितादिविसर्जने भवतः ।

कथितं मेऽत्र वाक्यानि कुमारीदर्शनादिकम् ।
आदावेतत् त्रयं कर्म पश्चात्कुर्याधिवासनमिति ॥

**इति श्रीमन्नृसिंहचरणपरिचारकश्रीमन्महोपाध्यायश्रीधरविरचितायां विवाहादिकर्मपञ्जिकायां कुमारीदर्शनादिकर्मत्रयं समाप्तम् ।**

---

Ni, ऽमुकरासिस्थिते Gu$_{1}$, अमुकराशीस्थिते Gu$_{2}$
1 °राशि°] Gu$_{1}$, °रा{रो}शौ° Ni, °राशौ° Ku, °रासौ° Gu$_{2}$
1 °चन्द्रमसि] em., °चान्द्रमसि NiKuGu$_{1}$Gu$_{2}$
1–2 °ग्रहयोगलग्नकरण°] Ku, °ग्रह{योग}लग्नयोगकरण° Ni, °ग्रहलग्नयोगकरण° Gu$_{1}$, °ग्रहयोगलग्न° Gu$_{2}$
2 °विशेषण°] NiGu$_{1}$Gu$_{2}$, °विधिविशेषण° Ku
2 °विशिष्टायां] NiKuGu$_{1}$, °विशिष्टाया Gu$_{2}$
2 पुण्याहःपुण्यतिथौ] NiKu, पुण्याहपुण्यतिथौ Gu$_{1}$, पुत्र्यतिथौ Gu$_{2}$
3 °पिप्पलाद°] NiKu, °पैप्पलाद° Gu$_{1}$, °पिपलाद° Gu$_{2}$
3 °शाखैक°] NiKuGu$_{2}$, °शाकैक° Gu$_{1}$
3 अमुकदेवशर्मणे] NiKuGu$_{2}$, अमुकशर्म्मणे Gu$_{1}$
4 °कालोप°] NiKuGu$_{1}$, °कालौप° Gu$_{2}$
4 अमुकसगोत्र-अमुकशर्मा] NiGu$_{1}$Gu$_{2}$, अमुकशर्मणे Ku
5 °देवीं] NiKu, °देवी Gu$_{1}$Gu$_{2}$
5 विवाहयितुं] NiKuGu$_{2}$, विवाहैतुं Gu$_{1}$
5 °सन्निधौ] NiKuGu$_{1}$, °सनिधौ Gu$_{2}$
6 गृह्योक्त°] NiKu, गुह्योक्त° Gu$_{1}$Gu$_{2}$
6 सत्यां सत्यां सत्यां] NiGu$_{2}$, सत्यां सत्यां KuGu$_{1}$
7 ब्राह्मणानामा°] NiKuGu$_{2}$, ब्राह्मनामा° Gu$_{1}$
7 °वादः ।] Ku inserts hereafter: व्यवहारस्तु प्रथमया मातृवस्त्रदानं ॥
7–8 रक्षाकरण°] corr., रक्षादिकरणं Ni, रक्षाकरणं KuGu$_{1}$Gu$_{2}$
9 मेऽत्र] Ku, मेऽत Ni, मेऽत्रऽ Gu$_{1}$, मे अत्र Gu$_{2}$
9 वाक्यानि] NiKuGu$_{1}$, वाक्यं च Gu$_{2}$
10 आदावेतत् त्रयं] Ku, आदावेत{न्त}त्रयं Ni, आदावेतन्त्रयं Gu$_{1}$, आदावेतत्त्रय Gu$_{2}$
10 °त्कुर्याधिवासनमिति ॥] NiGu$_{1}$, °त्कुर्याधिधात्मनं इति ॥ Ku, °कुर्याऽधिवासनं ॥ Gu$_{2}$
11–12 श्रीमन्नृसिंहचरण °°° कर्मपञ्जिकायां] NiKuGu$_{2}$, श्रीधरविरचितायां कर्मपञ्जिकायां Gu$_{1}$

(3)

# अधिवासविधिः

उद्यत्कोटीनिभं देवं नृसिंहं भक्तवत्सलम् ।
Ni 6r नत्वा वाक्कायमनसैर्विधिं वक्ष्येऽधिवासनम् ॥

Ku 6r तत्रादौ होतादीनां यो यस्मिन् नियुक्त एतेषां यानि लक्षणानि यानि नियमादीनि तान्याह ।

भवन्ति यस्य चत्वारो ब्राह्मणाः कर्मवाहकाः ।
एकस्तेषां भवेत्कर्ता सदस्या इतरे त्रयः ॥
ऋत्विक्कर्ता तथा ब्रह्मा होता याजक एव च ।
Gu$_2$ 7r एतानि कर्तृनामानि कथितानि मनीषिणा ॥

---

1–2 उद्यत्कोटी °°° वक्ष्येऽधिवासनम् ॥] Gu$_1$ omits the verse here, but had inserted it above, at the end of the Bahiḥśālā(śubha)vidhi (p. 11), together with some prose materials not traced in the other mss. The readings are quoted from that place.
1 उद्यत्कोटी°] Gu$_2$, उद्यत्कोटि° NiKu, उदत्कोटि° Gu$_1$
1 नृसिंहं] NiKuGu$_1$, नृसिहं Gu$_2$
2 वाक्कायमनसैर्विधिं] Gu$_1$Gu$_2$, वाक्कायमनसैविधि Ni, वाक्यामनसैर्विधिं Ku
2 वक्ष्ये] NiGu$_1$, वक्षे KuGu$_2$
2 °वासनम्] NiGu$_1$Gu$_2$, °नासनं Ku
3–4 तत्रादौ °°° तान्याह ।] Gu$_1$ omits this portion, replacing it by the following: मण्डपस्य पूर्वभागे धान्यराशीवुपरि उदककुम्भं निधाय तदुपरि च्यतपल्लवं तदुपरि नारिकेलफलं प्राङ्मौलि प्रत्यङ्मु{ख}लं दत्वा । तत पश्चिमे होताद्यासनं कल्पयित्वा ॥ कर्त्तुराद्युपयोगमा ॥
3 होतादीनां] NiKu, alt. Gu$_1$, om. Gu$_2$
3 यो यस्मिन्] KuGu$_2$, योगस्मिं Ni, alt. Gu$_1$
3–4 यानि नियमादीनि तान्याह] corr., यानि नीयमादीनि तान्याह Ni, यानियमादिनि तान्याह Ku, lac. Gu$_1$, यानि नियमानिनि न्याह Ku
5 भवन्ति] NiGu$_1$Gu$_2$, भवति Ku
6 एकस्तेषां] NiKuGu$_2$, एकस्ताषां Gu$_1$
6 इतरे] NiKuGu$_1$, ईतर Gu$_2$
7 ऋत्विक्कर्ता] NiKuGu$_1$, ऋत्विकर्त्ता Gu$_2$
7 याजक एव] NiKuGu$_2$, यजकयेव Gu$_1$
8 कर्तृ°] NiKu, कर्त्तु° Gu$_1$Gu$_2$
8 मनीषिणा] em., मनीषिणः NiKuGu$_1$,

सदस्या विधिद्रष्टारो मन्त्रादिन्यूनपूरकाः ।
उपद्रष्टा च एवैषां त्रयाणां नाम कथ्यते ॥
एतैश्चतुर्भिः संयुक्तो यजमानो न मुह्यति ।
यज्ञकर्मणि कर्ता च त्रिभिर्युक्तो न मुह्यति ॥

तथा च पैठीनसिः ।

चत्वारो ब्राह्मणा नित्या ऋत्विजः कर्मवाहकाः ।
चतुर्भिः संप्रयुक्तस्तु यजमानो न मुह्यति ॥
एकः कर्मणि युक्तः स्यादेको द्रव्योपकल्पने ।
एकः पृष्टः प्रतिब्रूयादेको मन्त्रस्य निश्चये ॥

तथा च मन्त्रादिविधिनिश्चयमाह । Gu$_1$ 10v

छन्दसि ब्राह्मणे सूत्रे यदव्यक्तं प्रदृश्यते ।
विद्वद्भिः सह निश्चित्य तद्यज्ञमवतारयेत् ॥
मन्त्रब्राह्मणकल्पानां विरोधो यत्र दृश्यते ।
किं प्रमाणं भवेत्तत्र मन्त्रः कल्पोऽथ ब्राह्मणम् ॥
मन्त्रास्तु पूर्वमुत्पन्नाः कल्पो मन्त्रानुसारतः ।
ब्राह्मणोऽत्र यथा ब्रूयात्तत्प्रमाणमिति स्थितिः ॥

---

11–12 Atharvavidhāna 48 (= Viṣṇudharmottarapurāṇa 2.127.46cd–47ab) छन्दसि ब्राह्मणे सूत्रे यदव्यक्तं प्रदृश्यते । विद्वद्भिः सह निश्चित्य तद्यज्ञमवतारयेत् ॥

---

मनिशिणः Gu$_2$
1 °द्रष्टारो] NiKuGu$_2$, °द्रंष्टारो Gu$_1$
2 उपद्रष्टा च] NiKu, उपद्रष्टार Gu$_1$Gu$_2$
2 त्रयाणां] NiKuGu$_1$, त्रयाणा Gu$_2$
3 संयुक्तो] NiGu$_1$Gu$_2$, संयुक्ते Ku
4 यज्ञकर्मणि °°° मुह्यति ॥] Ni and Gu$_2$ omit this half-verse, apparently through eye-skip
4 त्रिभिर्युक्तो] Ku, त्रिभियुक्तो Gu$_1$, lac. NiGu$_2$
7 चतुर्भिः] NiKuGu$_2$, चतुभिः Gu$_1$
7 °युक्तस्तु] NiKu, °युक्तो स्तु Gu$_1$, °मुक्तस्तु Gu$_2$
8 युक्तः स्यादेको] NiKu, युक्तः स्याको Gu$_1$, युक्तस्यदेको Gu$_2$
8 °कल्पने] KuGu$_1$Gu$_2$, °कल्पते Ni
9 एकः] NiKuGu$_1$, एक Gu$_2$
9 पृष्टः] corr., पृष्ठः NiKuGu$_1$Gu$_2$
9 °ब्रूयादेको] NiKuGu$_2$, °व्मायादेको Gu$_1$
10 मन्त्रादिविधिनिश्चयमाह] corr., मन्त्रादेविधिनिश्चयमाह Ni, मन्त्रादेविधिनिश्चयममाह Ku, मन्त्रादिविधिनियममाह Gu$_1$, मन्त्रादिविधिर्निश्चयममाह Gu$_2$
11 ब्राह्मणे] NiKuGu$_1$, ब्रह्मणे Gu$_2$
11 यदव्यक्तं] NiKuGu$_1$, यद्यव्यक्तं Gu$_2$
12 तद्यज्ञमवतारयेत्] Gu$_2$, तद्यक्तुत्कर्मवमतारयेत् Ni, त्रव्यञ्ज्ञन्मन्त्रवृमवतारयेत् Ku, तरोद्विज्ञमवतारयेत् Gu$_1$
14 भवेत्तत्र] KuGu$_1$Gu$_2$, भवेत्तस्य Ni
14 ब्राह्मणम्] NiKuGu$_1$, ब्राह्मणः Gu$_2$
16 ऽत्र] NiGu$_2$, अत्र Ku, ऽत Gu$_1$
16 ब्रूयात्तत्प्रमाणमिति] NiKuGu$_1$, ब्रूयात्तत्प्रणमिति Gu$_2$
16 स्थितिः] NiGu$_1$Gu$_2$, स्थितः Ku

मन्त्रा वै विस्तृता यज्ञे ऋत्विजो मन्त्रवाहकाः ।
यत्तु तत्क्रियते छिद्रं सदस्यास्तत्र तत्त्वगा इति ॥

Ku 6v अथ यस्मिन्कर्मणि यानि सम्भाराणि स्वसूत्रेऽभिहितानि स्वसूत्रलंघने कर्मस्याफलमाह ।

Ni 6v सम्भारा ये यथा यत्र यानि द्रव्याणि स्वे विधौ ।
शाखां प्रति यथा यत्र तत्प्रमाणमिति स्थितिः ॥
यः स्वसूत्रमतिक्रम्य परसूत्रेण वर्तते ।
$Gu_2$ 7v अप्रमाणविधिं कुर्यान्न स तेन समृध्यत इति ॥

तथा चान्य आहुः ।

ऊनार्थश्चाधिकार्थो वा यः स्वशाखोदितो विधिः ।

---

5–8 Atharvavidhāna 49–50abcd (= Viṣṇudharmottarapurāṇa 2.127.47cd–49ab) सम्भारा ये यथा यत्र यानि द्रव्याणि यो विधिः । शाखां प्रति तथा तत्र तत्प्रमाणमिति स्थितिः ॥ यः स्वसूत्रमतिक्रम्य परसूत्रेण वर्तते । अप्रमाणमृषिं कृत्वा सोऽप्यधर्मेण युज्यते ।
21.10–22.1 Keśavapaddhati on Kauśikasūtra 58.21 ऊनो वातिरिक्तो वा यः स्वशाखोदितो विधिः । तेनैव सर्वं संपूर्णं स्यान्न कुर्यात् पारतन्त्रिकम् ॥

---

1 विस्तृता] Ni, वित्स्मृता Ku, वित्स्थता $Gu_1$, वस्तृता $Gu_2$
1 °वाहकाः] NiKu$Gu_1$, °वाहका $Gu_2$
2 यत्तु] $Gu_1$, यस्तु NiKu$Gu_2$
2 तत्क्रियते] corr., तक्रियते NiKu, तित्क्रियते $Gu_1$, तत्कुऋते $Gu_2$
2 °स्तत्र तत्त्वगा इति] em., °स्तन्त तत्वगा इति Ni, °स्तंन्त्र तत्वगा इति Ku, °स्तन्त तत्वगाः $Gu_1$, °स्तन्त्र तत्वाग्रः $Gu_2$
3–4 अथ °°° कर्मस्याफलमाह ।] $Gu_1$ omits this prose paragraph and only gives the second of the following two verses; $Gu_1$ and Ku have given that same verse सम्भारा just above between the verses छन्दसि and मन्त्रब्राह्मणकल्पानां, where Ni and $Gu_2$ omit it and we have followed their testimony; Ku gives the verse in both places.
3 अथ] Ni$Gu_2$, om. Ku, lac. $Gu_1$
3 ऽभिहितानि] em., ऽभिहितं Ni, ऽभिहि Ku, lac. $Gu_1$, अऽभिहितं $Gu_2$
3 °लंघने] $Gu_2$, °लघने Ni, °लघगने Ku, lac. $Gu_1$
3 कर्मस्याफल°] NiKu, lac. $Gu_1$, कर्मणफल° $Gu_2$
5 यानि द्रव्याणि] NiKu, lac. $Gu_1$, यनि द्रव्यानि $Gu_2$
5 विधौ] NiKu, lac. $Gu_1$, निधौ $Gu_2$
6 स्थितिः] $Gu_2$, स्थितिं Ni, स्थितः Ku, lac. $Gu_1$
7 °क्रम्य] NiKu$Gu_2$, °क्रमी $Gu_1$
7 परसूत्रेण] NiKu$Gu_1$, दारसूत्रेण $Gu_2$
7 वर्तते] NiKu$Gu_1$$Gu_2^{pc}$, वर्त्तयेत् $Gu_2^{ac}$
8 स तेन] NiKu, स ते $Gu_1$, स तेन सतन $Gu_2$
8 समृध्यत इति] Ku, समृत इति Ni, समृद्ध्यत इति $Gu_1$, समृध्यते $Gu_2$
9 आहुः] NiKu$Gu_1$, आहु $Gu_2$
10 ऊनार्थश्चा°] Ku$Gu_1$, उशनार्थश्चा° Ni, उनर्थश्चा° $Gu_2$
10 °कार्थो] NiKu$Gu_1$, °कार्यो $Gu_2$

तं प्रयत्नेन कुर्वीत न कुर्यात्पारशाखिकम् ॥
तस्मात्सर्वप्रयत्नेन स्वसूत्रं न तु लङ्घयेत् ।
स्वसूत्रलङ्घनादेव नाप्नोति कर्मणः फलमिति ॥

अथ सदस्यादीनां लक्षणान्याह । भारक्याम् ।

मन्त्रब्राह्मणकल्पज्ञान् शान्तान् दान्तान् जितेन्द्रियान् ।
इतिहासपुराणज्ञान् भृग्वङ्गिरसकोविदान् ॥
सर्वकर्मसु निःशङ्कान् प्रयोगज्ञान् क्रियान्वितान् ।
इष्टांश्च श्रद्दधानांश्च सदस्यानुपवेशयेत् ॥
यद्यत्करोति वै कर्म तत्तत्तेषु नियोजयेत् ।
एतैः स्वाराधितं कर्म कर्ता सिद्धिमवाप्नुयात् ।

अथ होतुर्लक्षणमाह ।

याजकः श्रद्धानश्च जितक्रोधोऽनसूयकः ।
अलुब्धः सत्यवादी च धर्मज्ञो ब्राह्मणप्रियः ॥

---

2 Atharvavidhāna 50ef (= Viṣṇudharmottarapurāṇa 2.127.49cd) तस्मात् सर्वप्रयत्नेन स्वसूत्रं न विलङ्घयेत् ॥

---

1 कुर्वीत ] $NiGu_1$, कुर्वत Ku, कुर्वित $Gu_2$
1 कुर्यात्पारशाखिकम् ] $NiGu_1$, कुर्यात्परशाखिकं Ku, कुर्यात्पारशाखिनं $Gu_2$
2 °त्सर्व° ] $NiKuGu_1$, °त्सर्वं $Gu_2$
3 स्वसूत्र° ] $NiGu_2$, स्वसूत्रं $KuGu_1$
3 °लङ्घनादेव ] $NiKuGu_1$, °लघनादेव $Gu_2$
3 नाप्नोति ] NiKu, नाप्नोतिः $Gu_1$
3 कर्मणः ] $NiKuGu_1$, कर्मणा $Gu_2$
3 फलमिति ] $NiKuGu_1$, फलं $Gu_2$
4 अथ सदस्यादीनां ] NiKu, अ ऋत्वियादि $Gu_1$, अथ सदस्यानां $Gu_2$
4 लक्षणान्याह ] Ni, लक्षणन्याह Ku, लक्षणमाह $Gu_1Gu_2$
5–8 मन्त्रब्राह्मणकल्पज्ञान् °°° सदस्यानुपवेशयेत् ॥ ] These two verses are omitted in $Gu_1$
5 दान्तान् ] $NiGu_2$, om. Ku, lac. $Gu_1$
6 भृग्वङ्गिरसकोविदान् ] corr., भृग्वङ्गिरस{●}सकोविदान् Ni, भृग्वङ्गिरसे कोविद्वान् Ku, lac. $Gu_1$, भुग्यङ्गिरसकेविदान् $Gu_2$
7 प्रयोगज्ञान् ] Ni, प्रयोगकान् Ku, lac. $Gu_1$, om. $Gu_2$
8 इष्टांश्च ] NiKu, lac. $Gu_1$, इष्टं $Gu_2$
8 °धानांश्च ] NiKu, lac. $Gu_1$, °धानाश्च $Gu_2$
9 °त्करोति ] $NiKuGu_2$, °त्कोरोति $Gu_1$
9 तत्तत्तेषु ] corr., तत्रत्तेषु Ni, त्रत्तत्तेषु Ku, तत्तन्तेषु $Gu_1$, तंतुतेष्ठ $Gu_2$
9 नियोजयेत् ] $NiGu_1Gu_2$, नियोकयेत् Ku
10 एतैः ] NiKu, तैः $Gu_1$, एतै $Gu_2$
10 स्वाराधितं ] $KuGu_1$, स्वाराधिकं Ni, शाराधितं $Gu_2$
10 °वाप्नुयात् ] $NiKuGu_1$, °वप्नुयात् $Gu_2$
11 होतुर्ल° ] $NiKuGu_2$, होतुल° $Gu_1$
12 जितक्रोधो ] $Gu_1$, जितक्रो NiKu, जि{के}क्रोधो $Gu_2$
12 ऽनसूयकः ] Ku, ऽनुसूयकः $NiGu_1$, नुसूयकः $Gu_2$
13 अलुब्धः ] NiKu, अलुब्धुः $Gu_1$, अलुब्धुंः $Gu_2$

शीलवृत्तगुणोपेतो विद्याचारसमन्वितः ।
होता यस्येदृशो विद्वान् तस्य सिद्धिर्न संशय इति ॥

एतेषां नियममाह ।

पूर्वेद्युः सोपवासो वा हविष्याहार एव वा ।
$Gu_1$ 11r कर्ता भवेत्सदस्याश्च यजमानस्तथैव च ॥
वर्जनं मधुमांसानां माषस्य मसुरस्य च ।
$Gu_2$ 8r हविष्यं भवतीत्येव अन्ये त्वक्षारमूचिरे ॥

तथा च शास्त्रान्तरे अक्षारलक्षणान्याह ।

Ni 7r अस्विन्नधान्यं गव्यं च यवमुद्गौ तिलास्तथा ।
अक्षाराः कथिता ह्येते अन्ये क्षाराः प्रकीर्तिताः ॥

एवं स्थित्वा प्रभाते वै स्नात्वा सन्ध्यामुपास्य च ।
अनुकूलवशेनैव कृत्वा माध्याह्निकीं क्रियाम् ।
शुक्लवासाः शुचिर्दान्तः सत्यवादी दृढव्रतः ।
सदस्यैः सहितो याति यजमानस्य संनिधिम् ॥

---

1 शीलवृत्त॰] $NiGu_1$, शीलोवृत्त॰ Ku, शीलवृर्त्ती $Gu_2$
1 ॰गुणोपेतो] $NiKuGu_1$, ॰गणवेतो $Gu_2^{ac}$, ॰गणपेतो $Gu_2^{pc}$
1 विद्या॰] $NiGu_1Gu_2$, दिव्या॰ Ku
2 सिद्धिर्न] NiKu, सिधिर्न $Gu_1$, शिद्धिन $Gu_2$
2 संशय इति ॥] NiKu, संशयः ॥ $Gu_1$, संसयः ॥ $Gu_2$
3 एतेषां नियममाह] $NiKuGu_2$, अथ होतादीन्नियममाहा $Gu_1$
4 ॰हार] $NiKuGu_1$, ॰हर $Gu_2$
5 भवेत्स॰] $NiKuGu_1$, भवेस्य॰ $Gu_2$
5 ॰मानस्तथैव] $NiKuGu_1$, ॰मानतथैव $Gu_2$
6 मसुरस्य] $NiGu_1$, मधुरस्य Ku, मसूरास्य $Gu_2$
7 अन्ये] $NiKuGu_1$, दन्ये $Gu_1$
7 त्वक्षारमूचिरे] $Gu_2$, तत्क्षारमूचिरे Ni, तक्षारमूचिरे Ku, तुक्षारमृचिरे $Gu_1$
8 अक्षारलक्षणान्याह] corr., अक्षारलवषणान्याह Ni, अक्षारलक्षणन्याह Ku, om. $Gu_1$, अक्षारलवणन्याह $Gu_2$
9 अस्विन्नधान्यं] em., अस्विन्वं धान्यं $NiKuGu_1$, आश्विनधान्यं $Gu_2$
9 गव्यं] $NiGu_1Gu_2$, गद्यं Ku
9 यवमुद्गौ] $NiGu_1Gu_2$, यवमुङ्गो Ku
9 तिलास्तथा] $NiGu_2$, तिलस्तथा Ku, तिल{त}स्तथा $Gu_1$
11 प्रभाते वै] $NiKuGu_1$, वै प्रभाते वै $Gu_2$
12 अनुकूलवशेनैव] $KuGu_1$, अनुकूले वशेनैव Ni, अनकुलवसेनैव $Gu_2$
12 माध्याह्निकीं क्रियाम्] $NiKuGu_1$, मध्याह्निकां क्रयां $Gu_2$
13 ॰वासाः] $NiGu_1Gu_2$, ॰वासः Ku
13 ॰र्दान्तः] em., ॰र्दान्तो $NiKuGu_2$, ॰र्दान्ता $Gu_1$
23.14–24.4 सदस्यैः सहितो ॰॰॰ सदस्यैः सहितो वृतः] This passage is omitted in $Gu_2$ due to eye-skip
14 याति] NiKu, यातु $Gu_1$, lac. $Gu_2$
14 संनिधिम्] Ni, सन्निधौ Ku, सनिधौ $Gu_1$, lac. $Gu_2$

ततः स यजमानो वै कृतमाध्याह्निकक्रियः ।
ऋत्विजं वरयेद्धीमान् भूरादिविधिना यमी ॥

ब्रह्मालक्षणं तु ब्रह्मोपवेशनस्थाने कथयिष्यामः ।

ततः संभृतसंभारः सदस्यैः सहितो वृतः ।
स ऋत्विक् कर्म कुर्वीत यजमानसमृद्धये ॥

इति वचनादादौ सम्भारान्संभृत्य । ततो वरणं ब्राह्मणानां कुर्युरिति ।

तत्रादौ संकल्पविधिः । ततः शुद्धे दिवसे शुभकाले ऋत्विजैः सह यजमानः कृत- $Gu_1$ 11v
स्नानादिनित्यकृत्यः शुचिः शुक्लवासाः दृढव्रतः सत्यवादी शान्तो दान्तः पयःपूर्णताम्ब्र-
पात्रगन्धपुष्पनारिकेलफलान्वितः प्राङ्मुख आसने उपविष्टो नारायणं हृदि ध्यायन् संकल्पं

---

3 ब्रह्मोपवेशनस्थाने Cf. p. 71.

---

1 ॰माध्याह्निकक्रियः] corr., ॰माध्याह्निकः क्रियः Ni, ॰माध्याह्निकिकक्रियः Ku, ॰माध्याह्निकः क्रिया $Gu_1$, lac. $Gu_2$
2 वरयेद्धीमान्] corr., वरयेरर्द्धमान् NiKu, वयेद्दीमान् $Gu_1$, lac. $Gu_2$
2 यमी] $NiGu_1$, यथा Ku, lac. $Gu_2$
3 ब्रह्मालक्षणं तु] $Gu_1$, ब्रह्मलक्षणं तु Ni, ब्रह्मलक्षन्तु Ku, lac. $Gu_2$
3 ब्रह्मोपवेशन॰] NiKu, ब्रह्मोपशन॰ $Gu_1$, lac. $Gu_2$
4 वृतः] $NiGu_1$, वृतोः Ku, lac. $Gu_2$
5 यजमानसमृद्धये] $NiKuGu_2$, यजमृद्धये $Gu_1$
6 इति वचनादादौ सम्भारान्संभृत्य ।] $Gu_1$ omits this sentence, and gives here instead the four verses भूमिभागे, कुम्भस्थाः, अथर्ववेदो and तस्मात् that Ni and Ku give below (p. 31) and of which only the first is presented there in $Gu_2$. The precise reading of $Gu_1$ here is: भूमिभागे समे रम्ये प्रागुक्प्रवणे शुभे ॥ गोमयेनोपलिप्ते च ततस्त्रन्तं समाचरेत् ॥ कुम्भस्थाः पुजयेदापस्त्रन्तादौ सर्वकर्मणां । आपो भृग्वङ्गिरोऋपमिति श्रुतिनिदर्शनात् । तथा च मानवे धर्मशास्त्रे ॥ अथर्ववेदो वेदानामृग्यजुःसामलक्षणं । आमयं इदं शुभ्रमंहशामपनोदनमिति ॥ तस्माद्भृग्वङ्गिरोऋपमम्भःकुम्भं प्रपूजयेत् ॥ अलंकुर्याच्छिरैर्वस्त्रै गन्धमाल्यैः स्वशक्तित इति ॥ ॥
6 ततो ॰॰॰ कुर्युरिति ।] $Gu_1$ replaces this by वरणविधिऋच्यते ॥
6 ब्राह्मणानां] $Gu_2$, ब्राह्मणान् NiKu, lac. $Gu_1$
6 कुर्युरिति] NiKu, alt. $Gu_1$, कुर्युः $Gu_2$
7 संकल्पविधिः] NiKu, संकल्पः $Gu_1$, सकल्पविधिः $Gu_2$
7 ततः] $NiKuGu_2$, om. $Gu_1$
7 शुद्धे दिवसे शुभकाले] $NiKuGu_1$, शुभे काले शुद्धे दिवसे $Gu_2$
7 ऋत्विजैः] $NiKuGu_1$, ऋत्वग्भिः $Gu_2$
7 सह] $NiGu_1Gu_2$, स Ku
7–8 कृतस्नानादि॰] $NiGu_1Gu_2$, कृतः स्नानादि॰ Ku
8 ॰कृत्यः] $NiKuGu_1$, ॰क्रियः $Gu_2$
8 शुक्लवासाः] $NiGu_1$, शुक्लवासः Ku, शुक्लवासा $Gu_2$
8 पयः॰] Ni, पय॰ $KuGu_2$, यलः॰ $Gu_1$
9 ॰पात्र॰] corr., ॰पात्रे $NiKuGu_1$, ॰पात्रं $Gu_2$
9 ॰फलान्वितः] $NiKuGu_1$, ॰फलान्वितं कृत्वा $Gu_2$
9 प्राङ्मुख] $NiKuGu_2$, प्राङ्मुखो उदङ्मुखो वा $Gu_1$
9 उपविष्टो] $Gu_2$, उपविष्टः $NiGu_1$, उपविष्टः Ku
9 ध्यायन् संकल्पं] Thus $NiGu_2$. Ku

कुर्यात् । तत ॐ अद्य ब्रह्मण इत्यादि देवब्राह्मणसंनिधावित्यन्तं पूर्ववत् । विशेषस्तु । अमुकसगोत्रः श्रीमान् अमुकदेवशर्माहं मम पुत्रस्य दुहितुर्वा अमुकहोमकर्तुं ब्राह्मणद्वारा कारयिष्ये । अहं करिष्ये वा । इति संकल्पवाक्यम् ।

Gu$_2$ 8v अथ स्वस्तिवाचनम् । ब्राह्मणान् गन्धादिभिरभ्यर्च्य । अस्मिन् अमुकसगोत्रस्य Ni 7v अमुकशर्मणः पुत्रस्य दुहितुर्वा अधिवासादि-अमुकहोमकर्मणि पुण्याहं भवन्तो ब्रुवन्त्विति ब्रूयात् । ते ॐ पुण्याहमिति त्रिर्ब्रूयुः । एवं स्वस्ति भवन्तो ब्रुवन्त्विति वदेत् । ते च ॐ स्वस्तीति त्रिर्वदेयुः । एवमृद्धिं ऋद्धिं भवन्तो ब्रुवन्त्विति वदेत् । ते पुनः ॐ ऋध्यतामिति त्रिरभिदध्युः । इति स्वस्तिवाचनम् ।

ततो होतादीन् यथाक्रमं विधिना वृणुयात् । ततो यजमान ऋत्विजं आत्मसात्कृतं वरयेदित्याह परिभाषायाम् ।

सर्वकर्मणि विद्वान् सो नित्यनैमित्तिकादिके ।

1 पूर्ववत् Cf. pp. 14–15.

inserts between these two words प्राणायाम कृत्वा and Gu$_1$ inserts प्राणायामानकृत्वा
1 तत] Ni, तत्र KuGu$_2$, om. Gu$_1$
1 अद्य °°° पूर्ववत् । विशेषस्तु ।] Thus NiKu, while Gu$_2$ reads: अद्य ब्रह्मणो द्वितियपरार्द्धे इत्यदि °°° पूर्ववत् ॥. Gu$_1$ does not abbreviate, and reads: अद्य ब्रह्मणो दितीयपरार्द्धे श्वेतवराहकल्पे । वैवस्वतमनोः यथावत्परिमितेऽब्दे अमुकायने अमुके मासि अमुकपक्षे अमुकतिथौ अमुकवारे अमुकनकक्षत्रे अमुकराशिस्थिते श्रीभास्करे अमुकराशिस्थिते श्रीचन्द्रमसि यथास्थानावस्थितभौमादिग्रहयोग-करणमुहुर्त्तकांशकेषु । एवंविशेषणविशिष्टायां पुण्यतिथौ । इह पृथिव्यां जम्बुद्वीपे भारते वर्षे भरतखण्डे उत्कले देशे {मे} (see p. 14)
1 °संनिधावित्यन्तं] NiGu$_2$, °सन्निधादित्यन्तं Ku, alt. Gu$_1$
2 ब्राह्मणद्वारा] NiGu$_1$, ब्राह्मणद्वाराहं Ku, ब्राह्मद्वारामहं Gu$_2$
3 अहं] NiKuGu$_2$, om. Gu$_1$
4 अथ स्वस्तिवाचनम् ।] NiKuGu$_2$, ततो Gu$_1$
4 °गोत्रस्य] NiKuGu$_1$, °गोत्र Gu$_2$
5 °शर्मणः] NiKuGu$_1$, °शर्मणः Gu$_2$
5 दुहितुर्वा अधिवासादि-] NiKuGu$_2$, om. Gu$_1$
5 पुण्याहं] NiKuGu$_1$, पण्याहं Gu$_2$
6 पुण्याहमिति त्रिर्ब्रूयुः] Gu$_2$, पुण्याहमिति ब्रूयुः Ni, पुण्याहमिति त्रि ब्रूयुः KuGu$_1$
6 स्वस्ति] Gu$_1$Gu$_2$, स्वस्तिं NiKu
7 स्वस्तीति त्रिर्वदेयुः] NiGu$_1$, स्वस्तीत्रित्रिर्वदेत् Ku, स्वस्ति त्रि वदेयुः Gu$_2$
7 एवमृद्धिं] em., एवमौं ऋद्धिं NiKuGu$_1$, ऋद्धिं Gu$_2$
7 पुनः ॐ ऋध्यतामिति] पुनरौंमृध्यतामिति NiGu$_1$, पुनरौंम्रृद्ध्यतामिति Ku, च ऋध्यतामिति Gu$_2$
8 त्रिरभिदध्युः] NiKuGu$_1$, त्रि वदेयुः Gu$_2$
8 स्वस्तिवाचनम्] NiKuGu$_2$, पुन्याहवाचनं Gu$_1$
9 होतादीन्] NiGu$_2$, होतादीन KuGu$_1$
9–10 ततो °°° वरयेदित्याह परिभाषायाम् ।] This phrase is omitted in Gu$_1$, but see the variant reading in this ms. just after the Paribhāṣā quotation
9 यजमान] KuGu$_2$, यजमानं Ni, lac. Gu$_1$
9 ऋत्विजं] NiGu$_2$, ऋत्विज Ku, lac. Gu$_1$
9 आत्मसात्कृतं] Ni, आत्मात्कृतं Ku, lac. Gu$_1$, आत्मासात्कृतं Gu$_2$
11 °कर्मणि] NiGu$_2$, °कर्माणि KuGu$_1$
11 विद्वान् सो] corr., विद्वांसो NiKuGu$_1$, विद्वासो Gu$_2$
11 नित्यनैमित्तिकादिके] NiGu$_1$, नित्यं

ऋत्विजं यजमानो हि युञ्जीयादात्मसात्कृतम् ॥
आत्मार्थीश्च परार्थीश्च ऋत्विगेव प्रयोजयेत् ।
आत्मसात्तु कृतो यस्मादाशिषः सर्वकर्मसु ॥

इत्यादरेण वृणुयादिति ।

अथ भाव्यहोतृब्राह्मणं प्राङ्मुखं प्रत्यङ्मुखमुदङ्मुखं वा उपवेश्य । कर्ता आसनपादासनगन्धपुष्पादिभिरभ्यर्च्य । वस्त्रयज्ञोपवीतगन्धपुष्पताम्बूलकुण्डलमुद्रिकानारिकेलफलादिकं दक्षिणजंघायां गृहीत्वा । ॐ भूपते भुवनपते भुवां पते महतो भूतस्य पते [Gu$_2$ 9r] होतारं त्वां वृणीमह इति होतारमनुमन्त्रयेत् । यदा यजमानो वेदस्यासामर्थ्यात् तदान्यं ब्राह्मणं तत्प्रतिनिधित्वेन कर्तारं स्पृष्ट्वा मन्त्रं जपति । कारयिता च केवलं कर्म कुरु- [Ku 8r] ते । वाक्यं तु । ॐ अद्य पूर्वोक्तविशेषणविशिष्टायां पुण्यतिथौ । अमुकसगोत्रं अथर्ववेदपैप्पलादशाखाध्यायिनं अमुकदेवशर्माणं ब्राह्मणं संकल्पितेऽस्मिन् अमुककर्मणि होतृ- [Ni 8r] कर्म कर्तुं एभिर्वस्त्रयुगलयज्ञोपवीतगन्धपुष्पताम्बूलकुण्डलमुद्रिकानारिकेलफलादिभिर्होतारं त्वामहं वृणे । इत्यादरेण वृणीत । [Gu$_1$ 12v]

---

7–8 भूपते ◦◦◦ वृणीमहे VaitS 1.17

---

नैमित्तिकादिके Ku, नित्यनैमित्तिकादिने Gu$_2$
1 ऋत्विजं] NiKuGu$_1$, ऋत्विज Gu$_2$
2 आत्मार्थीश्च परार्थीश्च] NiKu, आत्मार्थाश्च परार्थाश्च Gu$_1$, आत्मार्थांश्च परार्थांश्च Gu$_1$
2 ऋत्विगेव] Gu$_1$, ऋत्विचोवि Ni, ऋत्विचोव Ku, ऋत्विजश्च Gu$_2$
3 आत्मसात्तु कृतो ] Ku, आ{त्मा}त्मसातु कृतो Ni, आत्मासान्तु कृतो Gu$_1$, आत्ममातु तो Gu$_2$
4 इत्यादरेण वृणुयादिति ।] Ni, इत्यादिवरेण वृणुयादिति । Ku, इति परिभाषाध्यायेऽभिहितं । Gu$_1$, इति वचनादत्यादरोण वृणुयात् । Gu$_2$
5 प्राङ्मुखं प्रत्यङ्मुखमुदङ्मुखं] Gu$_1$, प्रत्यङ्मुखं प्राङ्मुख उदङ्मुख Ni, प्रत्यङ्मुख उदङ्मुखं Ku, प्रत्यङ्मुखं प्राङ्मुखं Gu$_1$
5 वा उपवेश्य । कर्ता आसन◦] NiKuGu$_2$, उपवेश्यासन◦ Gu$_1$
6–7 वस्त्र◦◦◦फलादिकं] NiKuGu$_1$, वश्रगन्धपुष्पं यज्ञोपवीतताम्बुलकुण्डलमुद्रिकानारिकेलफलफलादीकं Gu$_2$
7 ◦जंघायां] NiKuGu$_1$, ◦जंघाया Gu$_2$
7 भूपते] KuGu$_2$, भूःपते Ni, भुःपते Gu$_1$
7 महतो] NiKuGu$_2$, om. Gu$_1$
8 त्वां] Ni$^{ac}$Ku, त्वा Ni$^{pc}$Gu$_1$Gu$_2$
8 होतारमनुमन्त्रयेत्] NiGu$_1$Gu$_2$, होतारमन्त्रयेत् Ku
8 यदा] Gu$_1$Gu$_2$, यद्वा NiKu
8 वेदस्यासामर्थ्यात् तदान्यं] NiKu, वेदमनधिकारि भवति तदाऽन्नं Gu$_1$, वेदस्यासामर्थात्तदात्तदाऽन्य Gu$_2$
9 तत्प्रति◦] NiGu$_1$, त्प्रति◦ Ku, प्रति◦ Gu$_2$
9 जपति] NiKuGu$_1$, जपेत् Gu$_2$
9 कारयिता] NiGu$_2$, कारयित्वा ता Ku, कारइत्वा Gu$_1$
10 पुण्य◦] NiKuGu$_1$, पुन्य◦ Gu$_2$
10–11 अथर्ववेदपैप्पलाद◦] Gu$_1$, अथर्ववेदान्तर्गतपिप्पलाद◦ Ni, अथर्ववेदपैप्पला◦ Ku, अथर्ववेदान्तर्गतपिपलाद◦ Gu$_2$
11 ◦शाखाध्यायिनं] KuGu$_1$Gu$_2$, ◦शाखैकदेशाध्यायिनं Ni
11 ◦देवशर्माणं ब्राह्मणं] NiKuGu$_1$, ◦सर्मणं Gu$_2$
11 ◦कर्मणि] NiKuGu$_2$, ◦सर्मणि Gu$_2$
11–12 होतृकर्म] NiGu$_1$, हो+ता+कर्म Ku, होत्रुकर्म Gu$_2$
12 एभिर्वस्त्रयुगल◦] NiKuGu$_1$, एभिर्वश्रजुगल◦ Gu$_2$
13 इत्यादरेण] NiKuGu$_2$, इत्याजरेण Gu$_1$

ततो होता तैरलंकृत आचम्य। वृतोऽस्मीति प्रतिवचनम्। ततो यथाविहितं होतृकर्म कुर्विति यजमानोक्ते ॐ करवाणीति होता प्रतिब्रूयात्।

ततः कारयितरि प्रत्यङ्मुखमुदङ्मुखं वावस्थातरि उदात्तानुदात्तस्वरितैस्त्रिभिः स्वरैर्जपति। ॐ अहं भूपतिरहं भुवनपतिरहं भुवां पतिरहं महतो भूतस्य पतिस्तदहं मनसे प्रब्रवीमि। मनो वाचे वाग्गायत्र्यै गायत्र्युष्णिह उष्णिगनुष्टुभे अनुष्टुब्बृहत्यै बृहती पंक्तये
Gu$_2$ 9v पंक्तिस्त्रिष्टुभे त्रिष्टुब्जगत्यै जगती प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यः। ॐ भूर्भुवः स्वर्जनद्बृहत्करद्रुहन्महत्तच्छम् ॐ। बृहस्पतिर्दैवो ब्रह्माहमसौ मानुष इति। असावित्यत्रामुकशर्मा मानुष इति उपांशु स्वनाम गृह्णीयात्। उपांशुलक्षणं यथा परिभाषायाम्।

Ku 8v उपविष्टो न शृणोति पार्श्वतोऽपि जनः क्वचित्।
तदुपांशु भवेद्वाक्यं यजुषो धर्म एव स इति॥

---

4–6 अहं भूपतिरहं ∘∘∘ प्रजापतिर्विश्वेभ्यो देवेभ्यः VaitS 1.18 6–7 ॐ भूर्भुवः स्वर्जनद्बृहत्करद्रुहन्महत्तच्छम् ॐ Cf. GB 2.2.14 and VaitS 17.6 7 बृहस्पतिर्दैवो ∘∘∘ मानुषः Cf. ŚāṅkhŚS 4.6.9

---

1 तैरलंकृत] NiKuGu$_1$, वस्त्रादिभिरलःकृत Gu$_2$
2 कुर्विति] corr., कुर्वीति Ni, कुर्वीत Ku, कुर्वित Gu$_1$, कर्वति Gu$_2$
2 यजमानोक्ते] NiKuGu$_1$, यजमान उक्ते Gu$_2$
2 प्रतिब्रूयात्] NiKuGu$_1$, ब्रूयात् Gu$_2$
3 ततः] NiGu$_2$, ततश्च KuGu$_1$
3 कारयितरि] NiKuGu$_1$, कारयित्यरि Gu$_2$
3 वावस्थातरि] KuGu$_1$Gu$_2$, वावस्मातरि Ni
3 उदात्तानुदात्त॰] NiKuGu$_2$, उदान्तानुदान्त॰ Gu$_1$
3–4 स्वरैर्ज॰] NiGu$_1$Gu$_2$, स्वरैज॰ Ku
4 ॐ अहं भूपतिरहं] Ni, ॐ भूः अहं पतिरहं Ku, अहं भूपतिरहं Gu$_1$Gu$_2$
5 मनो वाचे] NiGu$_1$Gu$_2$, मनो विचे Ku
5 वाग्गायत्र्यै] NiKu, वागगायत्र्यै Gu$_1$, वग्गयत्र्यै Gu$_2$
5 गायत्र्युष्णिह उष्णिगनुष्टुभे] corr., गायत्र्युष्णिवानुष्टुभे Ni, गायत्र्युष्टुवानुष्टुभे Ku, गायत्र्युष्णिहे उष्णिगनुष्टुभे Gu$_1$Gu$_2$
5 अनुष्टुब्बृहत्यै] Ni, अनुष्टुर्बृहत्यै Ku, अनुष्टुब्बृहष्वयै Gu$_1$, अनुष्टुब्बीहत्यै Gu$_2$
6 पंक्तिस्त्रिष्टुभे] NiGu$_2$, पंक्तित्रिष्टुभे त्रिष्टुभे Ku, पङ्क्ति त्रिष्टुभे Gu$_1$
6 त्रिष्टुब्जगत्यै] NiGu$_1$Gu$_2$, त्रिष्टुव्यगत्यै Ku
6 प्रजापतये] NiGu$_1$Gu$_2$, प्रजापतये प्रजापतये Ku
6–7 ॐ भूर्भुवः स्वर्जनद्बृहत्करद्रुहन्महत्तच्छम् ॐ] Gu$_2$, ॐ भूर्भुवः स्वजनद्बृहत्करद्रुहन्महत्तरामौं Ni, ॐ भूर्भुवः स्वर्जनवृहत्करद्धहमुहतत्समौं Ku, ॐ भूभुवः स्वर्जनद्बृहत्करद्रुहन्मदन्तरामौं ॐ Gu$_1$
7 बृहस्पतिर्दैवो] corr., बृहतिर्देवो Ni, बृहस्पतिर्देवो KuGu$_1$, बृहस्पतिर्देवा Gu$_2$
7 मानुष] NiKuGu$_2$, मानस Gu$_1$
7–8 असावित्यत्रामुकशर्मा] NiGu$_1$, असार्वित्यत्रा अमुकशर्म Ku, असावित्य अमुकशर्मा Gu$_2$
8 उपांशु] NiKuGu$_1$, उपाशुं Gu$_2$
8 स्वनाम] NiGu$_1$Gu$_2$, नाम Ku
8 उपांशु॰] NiKuGu$_1$, उपाशुं॰ Gu$_2$
8 यथा] NiKu, om. Gu$_1$
9 पार्श्वतोऽपि जनः] NiKuGu$_1$, वारश्वतोऽपि जःन Gu$_2$
10 तदुपांशु] NiKuGu$_1$, उपांशु Gu$_2$

इदानीं तदव्यवहारादस्य मन्त्रस्य स्वरा न निर्णीयन्ते। यद्यपि स्पृहयन्ति केचित्तदा राजकर्माध्याये भूधरेणोक्तम्। तत्रैव दर्शयितव्याः।

ततः कर्ता वृताय मधुपर्कं दद्यात्। स च दानप्रतिग्रहे कथयिष्यामः। वृतस्य तस्य ऋत्विक्कर्ताब्रह्महोताहावकयाजका इति शास्त्रप्रसिद्धानि षण्णामानि। इत्थं ब्रह्मद्र- Ni 8v
व्योपकल्पकपृष्टप्रतिवक्तृमन्त्रनिश्चायकान् क्रमेण वृणीत। वरणे विशेषः। होतृपदस्थाने Gu$_1$ 13r
ब्रह्मादिपदनिवेशनम्। अभावे ऋत्विग्ब्रह्माणौ द्वावेव वृतौ।

आचार्यं वरयेत्पूर्वं ब्रह्माणं तदनन्तरमिति।

अथवा ऋत्विङ्मात्रं वरणीयम्। ब्रह्मा पुनरुदपात्रम्। एवं त्रिविधा ब्राह्मणव्यवस्था। अथवा ऋत्विगभावे स्वयं यजमानः कर्ता स्यात्। तदा त इत्यादिस्थाने न इत्यादि प्रयोक्तव्यम्। तथा च परिभाषायाम्।

---

4 दानप्रतिग्रहे This topic will figure in chapter 10, to be published in vol. II of our edition.

---

1 तदव्यवहारादस्य] em., तदव्यव्यहारात् अस्य Ni, तु व्यवहारात् अस्य Ku, न्तनव्यव्यहारात् अस्य Gu$_1$, तुनव्यव्यहारात् अस्य Gu$_2$
1 निर्णीयन्ते] em., निर्णयन्ते Ni, निर्नयन्ते Ku, निण्णींन्ते Gu$_1$, निर्न्णयन्ते Gu$_2$
1–2 यद्यपि स्पृहयन्ति केचित्तदा राजकर्माध्याये भूधरेणोक्तम्। तत्रैव दर्शयितव्याः।] These two sentences are omitted in Gu$_1$
1 यद्यपि स्पृहयन्ति केचित्तदा] NiKu, lac. Gu$_1$, यद स्पृहन्ति केत्तदा Gu$_2$
2 तत्रैव दर्शयितव्याः] NiKu, lac. Gu$_1$, तत्रैवादर्शयिद्वा Gu$_2$
3 वृताय] NiKuGu$_1$, वृत्ताय Gu$_2$
3 मधुपर्कं] NiKuGu$_2$, यथाविधिना मधुपर्कं च Gu$_1$
4 तस्य] NiKuGu$_2$, त्रस्य Gu$_1$
4 °ब्रह्महोताहावकयाजका] NiKuGu$_1$, °ब्रह्माहोत्ताहावकयजका Gu$_2$
4 षण्णामानि] NiKuGu$_1$, पर्ण्णामानि Gu$_2$
4–5 इत्थं] NiKuGu$_1$, इथं Gu$_2$
5 °द्रव्योप°] NiKuGu$_1$, °द्रवोपर° Gu$_2$
5 °पृष्टप्रतिवक्तृ°] corr., °पृष्ठप्रतिवक्तृ° Ni, °पृष्ठप्रतिवक्तु° Ku, °पृष्ठप्रतिवकृ° Gu$_1$, °पृष्टप्रतिवक्त्रु° Gu$_2$
5 °निश्चायकान्] NiKuGu$_1$, °निश्चयज्ञान Gu$_2$
6 वरणे विशेषः।] Gu$_2$, वरणे विशेषः NiKu, विशेषस्तु Gu$_1$
6 ब्रह्मादिपद°] Gu$_1$Gu$_2$, ब्रह्माविपद° NiKu
7 ऋत्विग्ब्रह्माणौ द्वावेव वृतौ।] corr., om. NiGu$_2$, ऋत्विद्ब्रह्माणौ द्वावेव कृतौ। Ku, ऋग्ब्रह्माणौ द्वावेव वृतौ। Gu$_1$
7 आचार्यं °°° तदनन्तरमिति।] NiKu. This half-verse is found in Gu$_1$ immediately before the verse कर्माणि ऋत्विजोऽभावे and right after the three sentences अथवा ऋत्विङ्मात्रं °°° त्रिविधा ब्राह्मणव्यवस्था।
7 वरयेत्पूर्वं ब्रह्माणं] NiKu, वृणुयात्पुर्वं ब्रह्माणं Gu$_1$, वरयेद्ब्रह्माणं Gu$_2$
8 तदनन्तरमिति] NiKu, तदनन्तरं Gu$_1$Gu$_2$
28.9–29.1 अथवा ऋत्विङ्मात्रं °°° यदाचरेत्।] This entire prose passage and following half-verse are omitted in Gu$_2$
9 अथवा ऋत्विगभावे °°° परिभाषायाम्।] These three sentences are omitted in Gu$_1$
10 ऋत्विगभावे] Ku, ऋत्विशगभावे Ni, lac. Gu$_1$Gu$_2$

> कर्माणि ऋत्विजोऽभावे यजमानो यदाचरेत् ।
> न इत्यादि प्रयुञ्जीत त इत्यादि पराशिष इति ॥

इत्यधिवासे होतादिवरणम् ।

Ku 9r अथाधिवासकर्म । तत्रादावात्मनः शुद्ध्यर्थं पुरुषसंस्कारं होता कुर्यात् । तस्य विधि-
Gu$_2$ 10r रुच्यते । पूर्ववत् सष्यादिकमव्यसश्चेत्यृचमुक्त्वा । हिरण्यवर्णेति सूक्तान्ते ताम्ब्राद्यर्घ्य-
पात्रजलेन पवित्रकुशयुगलेनात्मानं संप्रोक्ष्य ।

पवित्रलक्षणं यथा ।

> अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
> प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचिदिति स्मृतेः ॥

---

5 अव्यसश्च PS 19.35.2 5 हिरण्यवर्णाः PS 1.25

---

5 पूर्ववत् Cf. p. 5.

8–9 Chandogapariśiṣṭa 1.2.10 अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥

---

2 प्रयुञ्जीत] Ni, प्रयुञ्जत Ku, प्रयुंजीत Gu$_1$, प्रयुग Gu$_2$

2 पराशिष इति ॥] NiKuGu$_2$, पराशिषमिति ॥Gu$_1$

4 अथाधिवासकर्म °°° विधिरुच्यते ।] Ku places before this the following paragraph: ततो बहिशालायां अधिवासकर्माङ्गत्वे आदौ पुऋषसंस्कारादिमितादिपूजा कर्त्तव्या ॥ तत्रादौ पुऋषसंस्कारविधिः ॥ ततः कर्त्ता ताम्ब्रादिपात्रे अर्घ्यपात्रं कृत्वा ॥ Gu$_1$ inserts the same paragraph (with insignificant variants) in place of this

4 तत्रादावात्मनः] corr., तत्रादावात्मनो Ni, तत्रादात्मनो Ku, lac. Gu$_1$, तत्रादात्मनः Gu$_2$

4 शुद्ध्यर्थं] Ku, श्मद्ध्यर्थं Ni, lac. Gu$_1$, शुद्धर्थं Gu$_2$

4 पुरुषसंस्कारं] NiGu$_2$, संस्कारं Ku, lac. Gu$_1$

5 पूर्ववत् सष्यादिकम°] Ni, पूर्ववत्सष्यादिकर्म° Ku, स ऋष्यादिकं पूर्ववद° Gu$_1$, पुरववत्सऋष्यादीकम° Gu$_2$

5–6 ताम्ब्राद्यर्घ्यपात्रजलेन पवित्रकुशयुगलेनात्मानं] Ku, ताम्ब्राद्यर्घपात्रजलेन पवित्रकुशयुगलेनात्मानं Ni, पवित्रकुशयुगलेनात्मानं अर्घ्यपात्रज्जलं Gu$_1$, ताम्ब्राद्यर्घपात्रे जलेन पवित्रकुशयुगलेनात्मानं Gu$_2$

6 संप्रोक्ष्य] NiGu$_2$, प्रोक्ष्य Ku, संप्रोक्ष Gu$_1$

7 यथा] NiKuGu$_2$, तु Gu$_1$

8 अनन्तर्गर्भिणं] corr., अनन्तगदर्भिणं Ni, अनन्तगर्भिणीं Ku, अनन्तगर्भिणी Gu$_1$, अनन्तं गर्भिणं Gu$_2$

8 साग्रं] NiKuGu$_1$, सग्रं Gu$_2$

8 कौशं] Gu$_2$, कुशं NiKuGu$_1$

9 प्रादेशमात्रं वि°] corr., प्रादेशमात्रवि° NiKuGu$_1$, प्रादेसमात्रं वि° Gu$_2$

9 कुत्रचिदिति स्मृतेः ॥] Ni, कुत्रचिदिदिति स्मृतेः ॥ Ku, कुत्रचिदिति ॥ Gu$_1$, कुत्रचित् ॥ इति स्मृते ॥ Gu$_2$

तदनन्तरं कर्ता पवित्रगणेन प्रत्यृचं स्वशिरस्यद्भिरभ्युक्ष्य । केचिद्गणान्तेऽपि । व्यवहारस्तु प्रत्यृचं स्नातीति ।

पवित्रगण उच्यते ।

ॐ बृहस्पतिर्ऋषिरनुष्टुप्छन्द आपो देवताद्भिरभ्युक्षणे विनियोग इति स्मृत्वा सहस्राक्षमिति सूक्तम् । आपः पुनन्त्वित्येका । आपो मा शुन्धन्त्विति षड़ृचः । पुनन्तु मा Ni 9r
वायोः पूत इति सूक्तद्वयम् । यदशुद्धमग्निर्मा पातु प्रथममग्निर्मा विश्वा इत्येकैका ऋक् । Gu$_1$ 13v
अस्य गणस्य पवित्र इति नाम ।

तदनन्तरं कर्ता यत्ते वास इत्यृचान्ते अहते वाससी अहतं वासो वा परिधाप्य ।

अहतवासस्य लक्षणमाह ।

> अहतं द्विप्रकारं तु तन्त्रोद्धृतं च धौतकम् ।
> प्रसारितदशं शुक्लमधौतं रजकेन यत् इति ॥

यदा चाधौतं तदाद्भिरभ्युक्ष्य पुण्डरीकाक्षस्मरणेन परिधातव्यमिति । तत आचमनं स्मार्तं

---

4–5 सहस्राक्षम् PS 9.25–26 5 आपः पुनन्तु PS 9.3.1 5 आपो मा शुन्धन्तु PS 10.9.4–10 5 पुनन्तु मा PS 19.7.10–12 6 वायोः पूतः PS 19.43.4–6 6 यदशुद्धम् PS 20.16.4 6 अग्निर्मा पातु प्रथमः PS 20.16.8 6 अग्निर्मा विश्वात् PS 20.23.5 8 यत्ते वासः PS 16.4.6

---

1 तदनन्तरं] NiGu$_1$, तदन्तरं Ku, तदनन्तंरं Gu$_2$
1 कर्ता] NiKuGu$_2$, om. Gu$_1$
1 पवित्रगणेन प्रत्यृचं] NiGu$_2$, प्रत्यृचं पवित्रगणेन Ku, पवित्रगणेन प्रत्यृच Gu$_1$
1 स्वशिरस्यद्भिरभ्युक्ष्य] Ni, स्वशिरःस्यद्भिरभ्युक्ष्य Ku, स्वशिरस्युद्भुक्ष्य Gu$_1$, स्वसिरस्यद्भिरभ्यु{•}क्ष Gu$_1$
1 केचिद्गणान्ते] NiGu$_1$Gu$_2$, केचिङ्गणान्ते Ku
2 स्नातीति ।] NiKu, स्नाति । Gu$_1$, स्नातिः Gu$_2$
3 पवित्रगण] NiKuGu$_2$, स Gu$_1$
3 उच्यते] em., उच्यन्ते NiKuGu$_1$Gu$_2$
4 बृहस्पतिर्ऋ°] em., बृहस्पतिऋ° NiKuGu$_1$Gu$_2$
4 देवताद्भिरभ्युक्षणे] Ni, देवता अभ्युक्षणे Ku, देवताद्भुक्षणे Gu$_1$, देवताऽभिरभ्युक्षणे Gu$_2$
4 विनियोग इति स्मृत्वा] NiKuGu$_2$, विनियोगः Gu$_1$
5 सूक्तम्] Ku and Gu$_1$ insert before this word: द्विकण्डिकं
5 आपः पुनन्त्वित्येका] NiKuGu$_1$, आप पूनन्त्येका Gu$_2$
6 प्रथममग्निर्मा] NiKuGu$_1$, प्रथमोमग्निर्मा Gu$_2$
8 तदनन्तरं कर्ता] NiKu, ततो Gu$_1$
8 यत्ते] NiKuGu$_1$, जत्ते Gu$_1$
8 अहतं] NiGu$_1$Gu$_2$, अहं Ku
8 वा परिधाप्य] Ni, परिधाप्य KuGu$_2$, वा कर्त्ता परिधाप्य Gu$_1$
9 अहतवासस्य] Ni, अत्र वासस्य Ku, अहतवस्त्र° Gu$_1$, अहतं वाससो Gu$_2$
10 द्विप्रकारं] Gu$_2$, द्विःप्रकार Ni, द्विःप्रकारन् Ku, द्विःप्रकारं Gu$_1$
10 तन्त्रोद्धृतं] NiKuGu$_1$, तन्त्रोर्द्धुतं Gu$_2$
10 च] NiKuGu$_1$, om. Gu$_2$
11 शुक्लमधौतं] KuGu$_1$Gu$_2$, शुक्ल धौतं Ni
11–12 रजकेन °°° यदा चाधौतं] Gu$_2$ omits these words due to eye-skip
11 यत् इति ॥] Ni, यत इति ॥ Ku, यत् ॥ Gu$_1$, lac. Gu$_2$
12 तदाद्भिरभ्युक्ष्य] corr., तदाऽद्भिरभ्युक्ष्य Ni, तदाद्भिरभ्युक्ष KuGu$_2$, तदाद्भिरभ्युक्ष्यु Gu$_1$
12 पुण्डरीकाक्षस्मरणेन] NiGu$_2$, पुण्डरीकाक्षंस्मरणेन Ku, om. Gu$_1$
12 तत आचमनं स्मार्तं] NiKuGu$_2$, आचमनं

Ku 9v कृत्वा । यस्ते गन्ध इति तिसृभिर्ऋग्भिर्गन्धैरनुलिप्य । पूर्ववत्सर्ष्यादिकं श्रियं धातरिति सूक्तान्ते शुक्लपुष्पैः स्वदेहमलंकुर्यात् । तत अव रेणुमव रज इति तिसृभिर्ऋग्भिः करौ शोधयितुमद्भिः प्रक्षालयेत् । पयस्वत्या कल्पजया चतुरवसानिकयाचम्य । प्रियं मा कृणु देवेष्वित्यृचा स्वगात्रस्थं यज्ञोपवीतमभिमन्त्रयेत् । एवमात्मनो विशुद्ध्यर्थं सर्वकर्मारम्भे Gu$_2$ 10v स्नानादियज्ञोपवीतान्तं कर्म कुर्यादिति । इत्यधिवासे पुरुषसंस्कारविधिः ।

अथ सकलकर्मप्राच्याङ्गभूतमितादिपूजाविधिः कथ्यते । तत उपकल्पितसम्भारसहिते सुसंस्कृते यज्ञमण्डपे होत्रादयो यथास्थानमुपविशन्ति ।

अथ भूसंस्कारमाह ।

---

1 यस्ते गन्धः PS 17.3.4–6 1 श्रियं धातः PS 19.48.17–19 2 अव रेणुमव रजः PS 7.3.7–9 3 पयस्वती कल्पजा Unidentified. The *sakalapāṭha* is given at PVSP, pp. 1–2 (emended): पयस्वतीरोषधयः पयस्वन् मामकं पयः । अपां पयसो यत्पयस्तेन मामिन्द्र संसृजः । पयः पिबामि रसमोषधीनां या मातरो जनयन्ति गर्भम् । ताः पीयमाना अमृतेन सार्द्धं कृण्वन्तु मामधरे सुप्रपीतम् ॥ 3–4 प्रियं मा कृणु देवेषु PS 2.32.5

---

Gu$_1$
1 कृत्वा] NiKuGu$_2$, कृत्व Gu$_1$
1 तिसृभिर्ऋग्भिर्गन्धैरनुलिप्य] corr., तिसृभिऋग्भिर्गन्धैरनुलिप्य Ni, तिसृभिर्गन्धैरनुलिप्य Ku, तिसृभिऋग्भिः शुक्लगन्धैलिप्य Gu$_1$, तिसृभिःर्ऋग्भिरङ्गे गन्धंरनुलम्पेत Gu$_2$
1–4 पूर्ववत्सर्ष्यादिकं °°° यज्ञोपवीतमभिमन्त्रयेत् ।] These sentences are omitted in Gu$_2$, possibly due to eye-skip
1 पूर्ववत्सर्ष्यादिकं] Ku, पूर्ववत्सष्यादिकं Ni, पूर्ववदृष्यादिकं Gu$_1$, lac. Gu$_2$
1 धातरिति] em., धातुरिति NiKuGu$_1$, lac. Gu$_2$
2 सूक्तान्ते] NiKu, सूक्तेन Gu$_1$, lac. Gu$_2$
2 शुक्लपुष्पैः स्वदेहमलं°] corr., शुक्लपुष्पैरलं° Ni, शुक्लपुष्पै स्वदेहंरलं° Ku, शुक्लपुष्पमालया स्वदेहेमलं° Gu$_1$, lac. Gu$_2$
2 तत] NiKu, तदनन्तरं Gu$_1$, lac. Gu$_2$
2 अव रेणुमव रज इति] NiKu, अव रेणुमिति Gu$_1$, lac. Gu$_2$
2 तिसृभिर्ऋग्भिः] corr., तिसृभिर्ऋग्भि Ni, तिसृभि ऋग्भि Ku, तिसृभिः Gu$_1$, lac. Gu$_2$
3 शोधयितुमद्भिः] Gu$_1$, शोधयितु Ni, शोधयितुंमद्भि Ku, lac. Gu$_2$
3 °सानिकयाचम्य] NiKu, °सानिकाचम्य Gu$_1$, lac. Gu$_2$
4 स्वगात्रस्थं] KuGu$_1$, गात्रस्थं Ni, lac. Gu$_2$
4–5 एवमात्मनो विशुद्ध्यर्थं सर्वकर्मारम्भे स्नानादियज्ञोपवीतान्तं कर्म कुर्यादिति ।] Ni, एवमात्मनो शुद्ध्यर्थं सर्वकर्मारम्भे विनियोगः ॥ स्नानादियज्ञोपवीतान्तं कर्म कुर्यादिति ॥ Ku, एवं सर्वकर्मारम्भे स्नानादियज्ञोपवीतान्तं कर्म कुर्यादात्मविशुद्धर्थं{कर्म} ॥ Gu$_1$, एवमात्मनो विशुर्थं सर्वकर्मारम्भे स्नानादियज्ञोपवितान्तं कर्म कुर्यादिति ।
5 °संस्कारविधिः] Ku, °संस्कारविधिधिः Ni, °संस्कारः Gu$_1$, °सस्कारविधिः Gu$_1$
6 सकल°] NiKuGu$_1$, om. Gu$_2$
6 °पूजाविधिः] NiKuGu$_2$, °पूजा Gu$_1$
6–7 तत उप°] NiKu, उप° Gu$_1$, तत्रोप° Gu$_2$
7 °सहिते] Gu$_2$, °सहितो NiKuGu$_1$
7 सुसंस्कृते] NiKu, सुसंस्कृत Gu$_1$Gu$_2$
7 होत्रादयो] NiKuGu$_1$, होतादयो Gu$_2$
8 °विशन्ति] NiGu$_2$, °विशति KuGu$_1$
31.8–32.13 अथ भूसंस्कारमाह । °°° संस्थाप्य ।] Gu$_1$ omits the heading, places the following verses elsewhere (see above, p. 24), and has here only the following prose: मण्डपस्य पूर्वभागे पूर्वस्थापितभृग्वङ्गिरकलशं तस्य दक्षिणपार्श्वे दीपमास्थाप्य ॥ भृग्वङ्गिरकलशं चन्दनेनोपलिप्य वाससा संवेष्ट्य सहकारपल्लवचयेपरितण्डुलपूर्णपात्रे नारिकेलफलं प्रत्यङ्मूलं स्थापये[Gu$_1$ 14r]त् ॥

भूमिभागे समे रम्ये प्रागुदक्प्रवणे शुभे ।
गोमयेनोपलिप्ते च ततस्तन्त्रं समाचरेदिति ॥

ततो मण्डपस्य पूर्वभागे पूर्ववद्भृग्वङ्गिरकलशं पूजार्थं संस्थाप्य । चन्दनेनोपलिप्य । Ni 9v
वाससा संवेष्ट्य । तथा च स्मृतिः ।

कुम्भस्थाः पूजयेदापस्तन्त्रादौ सर्वकर्मणाम् ।
आपो भृग्वङ्गिरो रूपमिति स्मृतिनिदर्शनादिति ॥

तथा च मानवे धर्मशास्त्रे ।

अथर्ववेदो वेदानामृग्यजुःसामलक्षणम् ।
आपोमयमिदं शुभ्रमंहसामपनोदनमिति ॥
तस्माद्भृग्वङ्गिरोरूपमम्भःकुम्भं प्रपूजयेत् ।
अलंकुर्यात्सितैर्वस्त्रैर्गन्धमाल्यैः स्वशक्तित इति ॥ Ku 10r

कलशस्य दक्षिणभागे दीपाधारके दीपमास्थाप्य । आत्मनो दक्षिणपार्श्वे पूजासामग्रीं निधाय । वामभागे जलपूर्णकर्करीं च । अग्रे शङ्खाद्यर्घ्यपात्रं संस्थाप्य ।

अथ मितादयः गण्यन्ते ।

मितश्च प्रमितश्चैव तथा शालकटंकटः ।

---

प्राङ्मौलिप्रत्यङ्मूलामितिवचनात् ॥ The individual readings for the verses are quoted from there.
1 प्रागुदक्प्रवणे ] Ni, प्रागुदक्प्रवणं Ku, प्रागुक्प्रवणे Gu$_1$, प्रागुक् प्रणे Gu$_2$
2 ततस्तन्त्रं ] NiKuGu$_2$, ततस्त्रन्तं Gu$_1$
2 ◦चरेदिति ॥ ] NiKu, ◦चरेत् ॥ Gu$_1$, ◦चरे ॥ Gu$_1$
3 ततो ] NiKuGu$_2$, om. Gu$_1$
3 पूर्ववद्भृ◦ ] Ni, पूर्ववभृ◦ KuGu$_2$, alt. Gu$_1$
3 संस्थाप्य ] NiGu$_2$, स्थाप्य Ku, alt. Gu$_1$
3–13 चन्दनेनोपलिप्य । ◦◦◦ संस्थाप्य । ] All of the intervening material is omitted in Gu$_2$, possibly due to eye-skip
4 वाससा ] NiGu$_1$, वाससी Ku, lac. Gu$_2$
5 पूजयेदापस्तन्त्रादौ ] corr., पूजयेदा{●}पस्तन्त्रादौ Ni, पूजयेर्दापस्तन्त्रादौ Ku, पुजयेदापस्त्रन्त्रादौ Gu$_1$, lac. Gu$_2$
6 स्मृतिनिदर्शनादिति ॥ ] NiKu, श्रुतिनिदर्शनात ॥ Gu$_1$, lac. Gu$_2$
9 आपोमयमिदं ] NiKu, आमयमिदं Gu$_1$, lac. Gu$_2$
9 शुभ्रमंहसामप◦ ] corr., शुभ्रसंह{●}सामप◦ Ni, शुभ्रंमंहसामप◦ Ku, शुभ्रमंहशामप◦ Gu$_1$, lac. Gu$_2$
10 तस्माद्भृ◦ ] Gu$_1$, तस्मात्भृ◦ NiKu, lac. Gu$_2$
10 ◦कुम्भं ] KuGu$_1$, ◦कुम्भः Ni, lac. Gu$_2$
11 ◦कुर्यात्सितैर्वस्त्रैर्गन्ध◦ ] corr., ◦कुर्याच्छितैर्वस्त्रैगन्ध◦ Ni, ◦कुर्याच्वितैर्वस्त्रैगन्ध◦ Ku, ◦कुर्याच्छिरैर्वस्त्रैगन्ध◦ Gu$_1$, lac. Gu$_2$
12 दीपमा◦ ] KuGu$_1$, दीपामा◦ Ni, lac. Gu$_2$
12 आत्मनो ] Ni, आसनो Ku, lac. Gu$_1$Gu$_2$
12–13 पूजासामग्रीं ] Ku, पूजासामिग्रीं Ni, lac. Gu$_1$Gu$_2$
14 गण्यन्ते ] NiKu, परिगण्यन्ते Gu$_1$Gu$_2$
3 अन्यं ब्राह्मणमनूचानमुपवेश्योदपात्रं] Ku, अन्यब्राह्मणमनूचानमुपवेश्योदपात्रं NiGu$_2$, अन्यं ब्रह्माणमुपवेश्योदपात्रं Gu$_1$
3 ब्रह्मालक्षणम्] NiKuGu$_2$, om. Gu$_1$
4 नम इति] NiGu$_1$Gu$_2$, om. Ku
4 तं स्पृशन् संमुखो] Ni, तं स्फृशन् सम्मुखो Ku, स्फुशन तत्सम्मुखो Gu$_1$, तं स्पृश{•}न सन्मुखो Gu$_2$
4 बृहस्पते] NiKuGu$_1$, बृस्पते Gu$_2$
5 त्रैस्वरेण मन्त्रोच्चारणं] Ni, त्रैःस्वरेण मन्त्रोच्चारणं Ku, त्रैस्वर्येणोच्चारणं मन्त्रं Gu$_1$, त्रैश्वर्येण मन्त्रोच्चारणं Gu$_2$
6 शान्त्युदक°] NiKuGu$_2$, शान्तुदक° Gu$_1$
6 ब्रह्माणं] Gu$_1$Gu$_2$, ब्राह्मणं NiKu
73.6–75.7 यदा साक्षाद् ब्रमा °°° ब्रह्मपार्श्वस्थसदस्यं पृच्छति] This passage is omitted in Gu$_2$ evidently due to eye-skip
7 तदोदपात्रसमीपस्थसदस्येनोक्तः] em., तदोदपात्रसमीपस्थः सदस्येनोक्तः Ni, तद्वोदपात्रसमीपस्थं सदस्येनोक्तः Ku, तदा उदपात्रसमिपस्थः सदस्येनोक्तं Gu$_1$, lac. Gu$_2$
7 बृहस्पतिप्रसूतः कुरुतां] NiKu, बृहस्पतिः प्रसूतः कृतां Gu$_1$, lac. Gu$_2$
8–9 कृतमशान्त्युदकं भवतीति] NiGu$_1$, कृत शान्त्युदकं न भवतीति Ku, lac. Gu$_2$
9 वचनात्] NiKu, om. Gu$_1$, lac. Gu$_2$
10 निदर्शनात्] NiKu, निर्शनात Gu$_1$, lac. Gu$_2$

तदनन्तरं होता अतिसृष्ट इति कण्डिका । येऽप्स्वन्तरग्नय इति दशभिः कल्पजा- Ni 21v भिर्वेदैर्बहिर्दक्षिणस्यां दिशि कंसपात्रात्तोयमनवच्छिन्नधारया भूमौ विसृजेत् । यच्छिवं तदिहेत्येतावता मन्त्रेण धाराशेषं पुनः कंसपात्रे प्रत्यासिच्य । ॐ वरुण ऋषिरनुष्टुप्छन्द आपो देवता आपस्तुतौ विनियोग इति स्मृत्वा । हिरण्यवर्णा आपो अद्यां यददः सं को वः पश्चादित्येकैका कण्डिका । एन्द्रो बाहुभ्यामिति द्वे कण्डिके । सस्रुषीरापो हि ष्ठेति द्वे तृचे सूक्ते । अप्सु ते राजन्निति तिस्रः । मा न आप इति द्वे ऋचौ । एतेनापांस्तोत्रगणेन तज्जलं प्राञ्जलिरभिष्टूयात् ।

अधुना शान्त्योषधयो भण्यन्ते ।

वासको मालुकापत्रमपामार्गौ सितारुणौ ।
वंशपत्रतृणं शिंशपा काशमूलश्च कम्पिलः ॥ Ku 24r

---

1 अतिसृष्टः PS 18.44 1 येऽप्स्वन्तरग्नयः The parallel in the Karmasamuccaya / PVSP makes clear that this *pratīka* does not refer to PS 10.9.1–10, but rather to a series of unidentified mantras. The single ms. of the Karmasamuccaya available to us for this part of that text (KS/$Gu_1$) seems to give the series only incompletely, so we cite the printed Paddhati, p. 67: येऽप्स्वन्तरग्नयः प्रविष्टा आयुर्हेदं तानति सृजामि । येऽप्स्वग्नयोऽति तान् सृजामि म्रोकं खनिं तनूदूषिम् ॥ यो व आपोऽग्निराविवेश स एष यद्वो घोरं तदेतत् ॥ [येऽप्स्वन्तरग्नयः प्रविष्टा वर्चोहेदं तानति सृजामि । येऽप्स्वग्नयोऽति तान् इत्यारभ्य तनूदूषिं यावत् ॥ इत्थं तेजोहा, सहोहा, यशोहा, बलहा, प्राणहा, सर्वहा, सर्वंसर्वहा, मन्त्रे आयुर्हास्थले संयोज्य पठनीयः । अन्यत्सर्वं पूर्ववत् ।] We have made corrections for individual words, but assume that the editor of the Paddhati has been unfaithful to the structure of his manuscript source(s), and that a portion like that which we print in brackets ought to be placed between the first and second mantras (so that the second becomes the last); our ms. entirely omits the *ūha*s, giving only the first two mantras seen in the printed Paddhati, then goes on straight to यच्छिवं तदिह 2–3 यच्छिवं तदिह Unidentified. PVSP, p. 67 4 हिरण्यवर्णाः PS 1.25 4 आपो अद्यानु (!) PS 1.33 4 यददः सम् PS 3.4 4–5 को वः पश्चात् PS 6.3 5 एन्द्रो बाहुभ्याम् PS 14.1–2 5 सस्रुषीः PS 19.4.10–12 5 आपो हि ष्ठा PS 19.45.8–10 6 अप्सु ते राजन् PS 20.33.4–6 6 मा न आपः PS 20.60.3–4

---

1 होता ] NiKu, om. $Gu_1$, lac. $Gu_2$
1 ऽप्स्वन्तरग्नय ] NiKu, ऽप्स्वन्तरग्नःयः प्रविष्टा $Gu_1$, lac. $Gu_2$
2 °र्वेदैर्बहिर्दक्षिणस्यां ] corr., °र्वेदैबर्हिर्दक्षिणस्यां Ni, °र्वेदैर्बर्हिर्दक्षिणस्यां Ku, °र्वेदैर्बहिर्दक्षिस्यां $Gu_1$, lac. $Gu_2$
2 °मनवच्छिन्न° ] corr., °मनविच्छिन्न° NiKu, °मन्नवच्छिन्न° $Gu_1$, lac. $Gu_2$
3 वरुण ] $KuGu_1$, वसव Ni, lac. $Gu_2$
4 आपस्तुतौ ] NiKu, आपः स्तुतौ $Gu_1$, lac. $Gu_2$
5 एन्द्रो ] NiKu, इन्द्रो $Gu_1$, lac. $Gu_2$
6 तृचे ] NiKu, इत्यृचे $Gu_1$, lac. $Gu_2$
6 राजन्निति ] Ku, रान्निति Ni, राजनिति $Gu_1$, lac. $Gu_2$
6 तिस्रः ] $KuGu_1$, तिः Ni, lac. $Gu_2$
6 इति द्वे ऋचौ ] Ni, इति द्वे Ku, उभे ऋचौ $Gu_1$, lac. $Gu_2$
6 एतेनापां° ] Ni, एतेषां Ku, अनेनापां° $Gu_1$, lac. $Gu_2$
7 प्राञ्जलिरभिष्टूयात् ] corr., प्राञ्जलिभि{•}रष्टुयात् Ni, प्राञ्जलिभिरभिष्टुयात् Ku, प्राञ्जलिरभिष्टुयात् $Gu_1$, lac. $Gu_2$
8 भण्यन्ते ] $NiGu_1$, ण्यन्ते Ku, lac. $Gu_2$
9 मालुकापत्र ] Ni, मालुंकापत्र Ku, वालुकापत्र $Gu_1$, lac. $Gu_2$

लाङ्गलादुद्धृता मृच्च वल्मीकसारमृत्तिका ।
प्रागग्रास्तिसृभिर्दूर्वा कुशः पालाशपत्रकम् ॥
धान्यं यव इमाः शान्त्योषधयो दश पञ्च च ॥

अथ द्रव्योपकल्पकः पलाशपत्रे शिवाडिपत्रे वा एता ओषधीः प्रक्षिप्य पुटिकां कृत्वा
कुशयुग्मेनाबध्नीयात् । कंसपात्रजलेन संप्रोक्ष्य हस्ते गृह्णीयात् । ततो याजको यद-
Gu$_1$ 26v हं वाजयन्नित्यृचा द्रव्योपकल्पकहस्तात्पुटिकां गृहीत्वा दक्षिणहस्ते आधाय ॐ सर्वा
इमा ओषधय इति ब्रह्मपार्श्वस्थसदस्यं पृच्छति । स ॐ सर्वा इति प्रतिवचनं ददाति ।
ॐ विश्वामित्र ऋषिर्देवी गायत्री छन्दः सविता देवता ओषध्यभिमन्त्रणे विनियोग इति
Ni 22r ध्यात्वा तत्सवितुरित्यृचा । ॐ सोम ऋषिरनुष्टुप्छन्द ओषधयो देवता अभिमन्त्रणे विनि-
योग इति ज्ञात्वा । या जाता इति द्वे कण्डिके । या बभ्रव इति तिस्रः कण्डिकाः । या
ओषधयः सोमराज्ञीरित्येकेति तृचं सूक्तम् । इत्यौषधिस्तोत्रगणेन पुटिकास्था ओषधीः
परिब्रूयात् । परिवचनमभिमन्त्रणमित्यर्थः । कंसपात्रे ता ओषधीः प्रक्षिप्य । ततः
पुनर्महाव्याहृतिसावित्रीशान्तीत्युक्त्वा ।

ॐ वरुण ऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता परिवचने विनियोग इति बुद्ध्वा । शं नो

---

5–6 यदहं वाजयन् PS 11.6.7 9 तत्सवितुः ṚV 3.62.10 10 या जाताः PS 11.6–7 10 या बभ्रवः PS 16.12–14 10–11 या ओषधयः सोमराज्ञीरित्येका PS 19.12.4–6 75.14–76.1 शं नो देवीः PS 1.1 (according to the Karmasamuccaya / PVSP, p. 76, two *kaṇḍikā*s, 1.1 and 1.2, are intended)

---

1 लाङ्गला॰] NiKu, लाङ्गिला॰ Gu$_1$, lac. Gu$_2$
1 वल्मीकसारमृत्तिका] corr., वल्मिकसामृत्तिका Ni, वल्मिकसारमृर्त्तिका Ku, वल्मिकसारमृत्तिका Gu$_1$, lac. Gu$_2$
2 पालाशपत्रकम्] NiKu, पलाशपत्रकं Gu$_1$, lac. Gu$_2$
3 धान्यं] NiKu, धन्यं Gu$_1$, lac. Gu$_2$
4 पलाशपत्रे] Ni, पालाशपत्रे Ku, पालाशंपत्रे Gu$_1$, lac. Gu$_2$
5 कंसपात्रजलेन ॰॰॰ गृह्णीयात् ।] Ku here presents a garbled text: कंसपात्रे जलेन संप्रोक्ष हस्ते गृह्णीयात् ॥ पात्रे जलेन संप्रोक्ष
5 कंसपात्रजलेन] Gu$_1$, कंसपात्रे जलेन NiKu, lac. Gu$_2$
5 संप्रोक्ष्य] Ni, संप्रोक्ष Ku, प्रोक्ष्य Gu$_1$, lac. Gu$_2$
6 द्रव्योपकल्पकहस्तात्पुटिकां गृहीत्वा] corr., द्रव्योपकहस्तात्पुटिकां गृहीत्वा Ni, द्रव्योपकल्पहस्ते पुटिकां गृहीत्वा Ku, द्रव्योपकल्पकहस्तेद्गृहीत्वा Gu$_1$, lac. Gu$_2$
7 ओषधय] NiGu$_1$, ओषधीय Ku, lac. Gu$_2$
7 सर्वा इति] em., सर्वेति NiGu$_1$Gu$_2$, सर्वे इति Ku
8 ऋषिर्देवी गायत्री] Ni, ऋषिर्देवी गात्री Ku, ऋषिर्गायत्री Gu$_1$, ऋषिर्देवि गायत्रि Gu$_2$
8 ओषध्यभिमन्त्रणे विनियोग] NiKuGu$_2$, om. Gu$_1$
9 ध्यात्वा] NiKu, ज्ञात्वा Gu$_1$, स्मृत्वा Gu$_2$
9 ओषधयो देवता] Ni, ओषधीर्देवता Ku, ओषधयो देववता Gu$_1$, ओसधयो देवता Gu$_2$
11 ॰राज्ञीरित्येकेति तृचं] Ni, ॰राज्ञीरित्येके त्यृचं KuGu$_2$, ॰राज्ञीरित्येकेतियृचं Gu$_1$
11 ॰गणेन पुटिकास्था] NiKu, ॰गणेनौषधीपुटिकास्था Gu$_1$, गणेन पुटीकास्था Gu$_2$
12 ॰वचनमभिमन्त्रणमित्यर्थः] NiKu, ॰वचनभिमन्त्रणं Gu$_1$, वचनंमभिमन्त्रणंमित्यर्थः Gu$_2$
12 ततः] NiGu$_1$Gu$_2$, om. Ku
13 पुनर्महा॰] Ku, पुनःर्म्महा॰ Ni, पुनर्मांहा॰ Gu$_1$, +पुन+र्महा॰ Gu$_2$
14 बुद्ध्वा] NiGu$_2$, ध्यात्वा Ku, बुधा Gu$_1$

देवी शं न इन्द्राग्नी इति द्वे कण्डिके । शं मा वात इत्यृक् । शान्ता द्यौरिति कल्प-
जा कण्डिका । एतैः शान्तिगणनामभिः पुनर्महाव्याहृतिसावित्रीशान्तिभिश्च पर्याह ।
तदनन्तरं सावित्रीं द्विः परिवदेत् । ततः कर्ता अग्नेरुत्तरतः प्रधानवेदिमध्ये अङ्गारमा- Ku 24v
हृत्य । तत्र सोमाय स्वाहेति मन्त्रेण शान्त्युदकं हस्तेन सकृज्जुहोति । तदङ्गारमन्यतः
क्षिप्त्वा हस्तं प्रक्षाल्य । ततः परि प्रागादिति द्वाभ्यामृग्भ्यां द्विरावृत्त्या शान्त्युदकेनाग्निं
संप्रोक्ष्य । ततो जीवा स्थेति चतस्र इन्द्र जीवेत्येका आभिजीवन्तीसंज्ञाभिर्ऋग्भिः कंस-
पात्रस्थजलं मन्त्रावृत्त्या द्विरभिमन्त्र्य । तज्जलं कियद्गृहीत्वा सकृदाचामेत् । अपरमुदकं Gu$_1$ 27r
गृहीत्वात्मानमभ्युक्ष्य । वेदिं सम्भारांश्च सिञ्चति । शान्त्युदकेनाचमनाभ्युक्षणमात्रं Gu$_2$ 25r
करोति । अन्योदकेन स्मार्तमाचमनं करोतीति सर्वत्रैवं कार्यम् । इति पूर्वतन्त्रे शान्त्युदकं
समाप्तम् ।

अथ कर्ता बर्हिश्छेदनार्थं कुशस्थानकृतगमनः । कुशदेशं प्राप्य । प्रक्षालितकरचरण- Ni 22v

---

1 शं न इन्द्राग्नी PS 12.16–17 1 शं मा वातः PS 20.34.1 1 शान्ता द्यौः ŚS 19.9 5 परि प्रागात् PS 10.1.12–13 6 जीवा स्थ PS 19.55.12–15 6 इन्द्र जीव PS 20.43.1

---

1–2 कल्पजा] NiGu$_1$Gu$_2$, om. Ku
2 पुनर्महा◦] NiKu, पुनर्माहा◦ Gu$_1$, पुनर्म◦ Gu$_2$
3 अग्नेरुत्तरतः] KuGu$_2$, अग्नेऋत्तरः Ni, अग्नेऋत्ततः Gu$_1$
3–4 अङ्गारमाहृत्य] NiKuGu$_2$, अङ्गारङ्कां माहत्य Gu$_1$
4 हस्तेन] NiKuGu$_2$, om. Gu$_1$
4–5 ◦मन्यतः क्षिप्त्वा] NiKu, ◦मन्यत क्षिप्य Gu$_1$, अन्यन्य क्षिप्त्या Gu$_2$
5 हस्तं प्रक्षाल्य] KuGu$_2$, हस्तं प्रिक्षाल्य Ni, om. Gu$_1$
5 परि] NiKuGu$_1$, प्ररि Gu$_2$
5 द्वाभ्यामृग्भ्यां द्विरावृत्त्या शान्त्युदकेनाग्निं] corr., द्वाभ्यामृग्भ्यां द्विरावृत्या शान्त्युदकेनाग्निं NiKu, द्वाभ्यांमृगुभ्यां अग्निं द्विरावृत्या शान्त्युदकेन Gu$_1$, द्वाभ्यामृग्भ्यां द्विरावृत्या शान्त्युदकेनाग्नि Gu$_2$
6 स्थेति] NiKuGu$_1$, स्तेति Gu$_2$
6 ◦त्येका आभिजीवन्तीसंज्ञाभिर्ऋग्भिः] corr., ◦त्ये आभिजीवन्तीसंज्ञाभिर्ऋग्भिः Ni, ◦त्येका अभिजीवन्तीसंज्ञाभिर्ऋग्भिः Ku, ◦त्यका आभिजीवन्तीसंज्ञाभिर्ऋग्भिः Gu$_1$, ◦त्येका एताभिः Gu$_2$
6–7 कंसपात्रस्थजलं] NiKuGu$_2$, कंसपात्रजलं Gu$_1$
7 कियद्गृ◦] NiKu, किंचिदगृ◦ Gu$_1$, सकृद्गृ◦ Gu$_2$
7 ◦चामेत्] Ni, ◦चामयेत् Ku, ◦चामेत Gu$_1$, ◦चमेत् Gu$_2$
8 ◦त्मानमभ्युक्ष्य] NiGu$_1$, ◦त्मानमभ्युक्ष Ku, आसनमभ्युक्ष्य Gu$_2$
8 वेदिं सम्भारांश्च सिञ्चति] corr., वेदिं सम्भारांश्च सिञ्चतिति Ni, वेदिसम्भारांश्च सिञ्चति Ku, वेदिं सम्भारांश्चासिञ्चतीति Gu$_1$, वेदिम्भारा सिञ्चति ॥ ति Gu$_2$
8 ◦चमनाभ्युक्षणमात्रं] NiKuGu$_2$, ◦चमनाभ्युक्षमात्र Gu$_1$
9 अन्योदकेन] NiKuGu$_1$, अन्योदके Gu$_2$
9 सर्वत्रैवं] NiGu$_2$, सर्वत्रैकं Ku, सर्वत्र Gu$_1$
9 पूर्वतन्त्रे] NiKuGu$_2$, तन्त्राध्याये Gu$_1$
11 कर्ता] NiKu, om. Gu$_1$, कर्त्त Gu$_2$
11 बर्हिश्छेदनार्थं] NiGu$_1$, बर्हि{श्छ}छेदनार्थं Ku, बर्हिछेदनार्थं Gu$_2$
11 ◦स्थानकृतगमनः] NiKuGu$_1$, ◦स्थानं कृतं गमनं Gu$_2$

वदनः । अव्यसश्चेत्युक्त्वा । इदं विष्णुरिति कल्पजार्धर्चेन बर्हिश्छेत्तुं गन्धपुष्पादिना संपूज्य । स्पृष्ट्वा विष्णुमनुज्ञापयेत् । ततः कुशान् तूष्णीं मूलानि छित्त्वा । भिन्नदग्धच्छिन्नशुष्कातिदीर्घातिह्रस्वातिसूक्ष्मातिस्थूलातिरिक्तान् गोकर्णप्रमाणांस्तानादाय । सोम इदं संनहतामित्यवसानेन मध्यप्रदेशे दक्षिणावर्तेन सुदृढं कुशद्वयेनान्येन वा संनह्य । दैवं बर्हिरित्यवसानेन यत्किंचिद्विरुद्धं स्तरणायोग्यं वामकरेण परिजह्यात् । तत उदकपात्राम्भः समालभ्य । सहस्रवल्शेत्यवसानेन शिरसादारभ्य पादतलावसानं आत्मानं
Ku 25r दक्षिणपाणिना स्पृशेत् । आ प्यायन्तामिति सार्धर्चेन छिन्नानि दर्भमूलानि परितो जलेन
Gu$_1$ 27v सिक्तानि प्रारोहणाय । तत्स्पृष्ट्वानुमन्त्रयेत् । यस्मात्कोशादिति कृत्वा । कुशदेशमुत्सृज्य
Gu$_2$ 25v होमालयमागच्छति । तथा च परिभाषायाम् ।

---

1 अव्यसश्च PS 19.35.2 1 इदं विष्णुः Unidentified. The *sakalapāṭha* is given at PVSP, pp. 79–80: इदं विष्णुरनुजानाद्वर्हिर्या द्विषद्विष एतः पुरस्तात् ॥ (text exactly as printed; ms. KS/Gu$_1$ reads एताः but otherwise has the same obscure text; in any case the mantra is not to be identified as ŚS 7.26.4) 3–4 सोम इदं संनहताम् Unidentified. The *sakalapāṭha* is given at PVSP, p. 80 (as printed): सोम इदं संन्नहतां ब्रतेन प्रदक्षिणं जज्ज्बनास्तत्प्रजाबत् । 4–5 दैवं बर्हिः Cf. TS 1.1.2.1i. A *sakalapāṭha* with insignificant variants is given at PVSP, p. 80. 6 सहस्रवल्शाः Cf. TS 1.1.2.1i–2. A *sakalapāṭha* with insignificant variants is given ibid. 7 आ प्यायन्ताम् Unidentified. The *sakalapāṭha* is given at PVSP, p. 80 (as printed): आ प्यायन्तामोषधयः पृथिव्या दर्भा बध्नन्तु बीरुधाम् । तेन ओषथीनां बीर्य्यं लक्ष्मीर्बलं बले । ताभि र्बोभृगबः प्राणान् परिषिञ्चन्तु तेजसा ॥ 8 यस्मात्कोशात् PS 19.35.3

---

1 कल्पजार्धर्चेन ] corr., कल्पजार्द्धर्चेन Ni, कल्पजार्द्धर्च्चेन KuGu$_1$, कल्पजाधर्च्चेन Gu$_2$
1 बर्हिश्छेत्तुं ] NiGu$_1$, बर्हित्शेत्तुं Ku, बर्हिश्छेदनं : तं Gu$_2$
2 स्पृष्ट्वा ] NiKuGu$_1$, स्पृष्टा Gu$_2$
2 तूष्णीं ] Ni, तूष्णी Ku, तूष्णा Gu$_1$, तूष्णि Gu$_2$
2–3 °च्छिन्नशुष्कातिदीर्घातिह्रस्वातिसूक्ष्मातिस्थूलातिरिक्तान् ] corr., °छिन्नशुष्कातिह्रस्वातिसूक्ष्मातिस्थूलातिरिक्तान् Ni, °छिनशुष्कातिह्रस्वातस्थूसूक्ष्मस्थूलाऽतिरिक्तान् Ku, °सुष्कातीदीर्घातिह्रस्वातिसूक्ष्मातिस्थूलातिरक्त्रान् Gu$_1$, °छिन्नशुष्कातिदीर्घातिह्रस्वाति {स्म} सूक्ष्मातिस्थुलातिरिक्तन् Gu$_2$
3 °प्रमाणांस्तानादाय ] NiGu$_2$, °प्रमाणं ह्वादाय Ku, °प्रमाणंस्तानादाय Gu$_1$
4 दक्षिणावर्तेन ] KuGu$_1$, दक्षिणाप्रवर्त्तने Ni, दक्षिणावर्त्तन Gu$_2$
4 सुदृढं ] NiKuGu$_1$, सदृढं Gu$_2$
5 यत्किंचिद्विरुद्धं ] Gu$_2$, यत्किंचिद्विद्धं Ni, यत्किंचिद्विॠद्धा Ku, यत्किंचद्विॠद्धं Gu$_1$
5 परिजह्यात् ] NiGu$_1$, परिकल्प्य जह्यात् Ku, परिजह्यात Gu$_2$
5–6 उदकपात्राम्भः ] Ku, उकपात्राम्भः Ni, उदपात्राम्भः Gu$_1$, ॠदपाम्भः Gu$_2$
6 सहस्रवल्शे° ] NiKu, सहस्रेवल्शे° Gu$_1$, सहश्रवलिशे° Gu$_2$
6 शिरसादारभ्य ] KuGu$_1$Gu$_2$, शिरसारभ्य Ni
7 प्यायन्तामिति ] NiGu$_1$Gu$_2$, प्ययन्तामिति Ku
7 छिन्नानि ] NiKuGu$_1$, छिर्न्नानि Gu$_2$
7 परितो ] NiKuGu$_2$, परितः परितः Gu$_1$
8 तत्स्पृष्ट्वा° ] NiKu, तस्फष्टा° Gu$_1$, तं स्पृष्टा° Gu$_2$
8 °दिति कृत्वा ] NiKuGu$_2$, °दित्यृचा Gu$_1$
8 °मुत्सृज्य ] Ni, °मृत्यज्य KuGu$_1$, °मुत्सृर्य्य Gu$_2$
9 होमालयमागच्छति ] corr., होमालयमागछति NiGu$_1$, °होमालयमागतिः Ku, होमालयोमा{●●}गछति Gu$_2$

छिन्नमूलाः कुशा ज्ञेयाः समूलाः कुतपाः स्मृताः ।
उपमूलास्तथा दर्भाः पुष्पिता बर्हिषः स्मृताः ॥
पूर्वानीतस्य दर्भस्य कुर्यान्मूलयुतस्य च ।
लवनादिकसंस्कारं गृहस्थितस्य मन्त्रतः ॥
पृथग्भूतेऽप्यवयवे संस्कृते मणिवृक्षवत् ।
यत्र तत्र स्थितो वापि संस्कृतोऽवयवी भवेत् ॥
तथा च श्रूयते लोके वर्धन्ते केशिनः कचाः ।
लूनानामेव केशानां विशिष्टस्थानसंश्रयादिति ॥

तथा चावयविनियुक्तानां इदं विष्णुरित्यादिमन्त्राणामवयवे विनियोगो न दुष्यति । Ni 23r
इति बर्हिश्छेदनम् ।

अथ होता वेदेः पश्चिमभागे पूर्वाभिमुख उपविश्य । तत अभिवृष्टा इत्यृचा प्रस्तरणाय शान्त्युदकेन बर्हिः संप्रोक्ष्य । विमुञ्चताद्वरुणो ग्रन्थिमित्यृचा कुशमुष्टिबन्धनरज्ज्वां ग्रन्थिं फेटयित्वा तां विमुच्य । दक्षिणहस्ते कुशान् संगृह्य । स्तृणीत बर्हिरिति चतस्र

11 अभिवृष्टाः PS 16.21.6   12 विमुञ्चताद्वरुणो ग्रन्थिम् Unidentified. The *sakalapāṭha* is given in PVSP, p. 80 (emended, all sources मुञ्चतां): वि मुञ्चताद्वरुणो ग्रन्थिमेतं सोमेन यो ग्रथित ओषधीनाम् । तमेतममृतेन सिक्तमापो मुञ्चन्तु मातरः ॥   13 स्तृणीत बर्हिः Some elements of these four stanzas are known at ŚS 7.99.1, TS 1.3.7.2c, KauśS 108.2, etc. The *sakalapāṭha* is given in PVSP, pp. 81–82 (corrected): स्तृणीत बर्हिः परि धत्त वेदिं जामिं मा हिंसीरमुया शयानाम् । दर्भैः स्तृणीतैर्हरितैः सुपर्णैर्निष्का एते यजमानस्य सन्तु ॥ १ ॥ परि स्तृणीहि परि धेहि वेदिं मा जामिं मोषीरमुया शयानाम् । होतृषदनं हरितं हिरण्ययं रुक्मा एते यजमानस्य सन्तु ॥ २ ॥ परि स्तृणीत परि धत्त वेदिं पश्चात्प्राञ्चं नि बोधत । वेत्त वेदिं तथा बर्हिर्वासो यज्ञे न उत्तमम् ॥ ३ ॥ तृणानि वेदिं बहुलां सुमध्यमां वासो ह्येतत्कवयो वेदयन्ते । तत्रा पुत्रैः पशुभिस्तनूभिरनग्नाः सन्तु यजमानस्य कामाः । मा यज्ञं हिंसिष्ट मा यज्ञपतिम् ॥ ४ ॥

2 बर्हिषः] Gu$_1$, बहिषः Ni, बहिष Ku, बर्हिषं Gu$_2$
3 पूर्वानीतस्य दर्भस्य] NiKuGu$_1$, पूर्वाणि तस्य दर्भास्य Gu$_2$
4 गृहस्थितस्य] NiGu$_1$Gu$_2$, गृहस्थितस Ku
5 पृथग्भूतेऽप्यवयवे] NiGu$_1$, पृथग्भूतेप्यवयवे Ku, पृथग्भूतेण्यवयवे Gu$_2$
5 संस्कृते मणिवृक्षवत्] NiGu$_1$, संस्कृते ण्यवक्षजत् Ku, सस्कृते मणिवृक्षवत् Gu$_2$
8 लूनानामेव] KuGu$_1$, नूनानामेव Ni, लुकानामेव Gu$_2$
8 विशिष्ट°] NiKuGu$_2$, विष्ट° Gu$_1$
9 चावयविनियुक्तानां] corr., चावयविवियुक्तानां Ni, चवयविनियुक्तानां च Ku, चावायविनियुक्ता {त्यां} नां Gu$_1$, वयवीनियुक्ताना Gu$_2$
9 न दुष्यति] NiKuGu$_1$, नुदिस्यति Gu$_2$
11 पश्चिमभागे] NiKuGu$_2$, पश्चिमे Gu$_1$
11 °मुख उपविश्य] em., °मुखोपविश्य NiKuGu$_1$Gu$_2$
11 तत] NiKu, om. Gu$_1$, ततः Gu$_2$
11 अभिवृष्टा] Ku, अभिसृष्टा Ni, अभिवृष्टा ओषधय Gu$_1$, रभिवृष्टा Gu$_2$
12 विमुञ्चताद्वरुणो] em., विमुञ्चतां वऋणो NiKu, विमुञ्चता वऋणो Gu$_1$, विमुञ्चतामित्यृचा ॥ विमुञ्चता वऋणो Gu$_2$
12 ग्रन्थिमित्यृचा] NiKu, ग्रन्थिमेतदित्यृचा Gu$_1$, ग्रन्थीमित्यृचा Gu$_2$
13 °टयित्वा] NiKuGu$_1$, °टयति ॥ त्वा ॥ Gu$_2$
13 °हस्ते कुशान्] NiKuGu$_1$, °हस्तेन कुसान Gu$_2$
13 संगृह्य] NiKuGu$_2$, संगह्य Gu$_1$
13 स्तृणीत] KuGu$_1$, स्तृणी Ni, स्तृणित Gu$_2$

ऋचः वनस्पतय इत्यवसानं बृहस्पतिर्ब्रह्मेत्यृक् । एतान् केवलोदात्तस्वरेण पठितान् सं-
Gu$_2$ 26r प्रेषणमन्त्रान् जपेदृत्विक् । मन्त्रानेकस्वरेणेति वचनात् । परिभाषायाम् ।

> मन्त्रानेकस्वरेणैव संप्रेष्याज्ञानवाचने ।
> त्रैस्वरेण प्रयुञ्जीत जपहोमादिकर्मसु ॥
> पठ्यते यत्र चैकेन स्वरेणोदात्तकेन वै ।
> तदेकश्रुतिपाठः स्याद्युज्यते वाचनादिषु ॥

यथा ।

> Gu$_1$ 28r मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।
> Ku 25v स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधादिति ॥

अत्र जपानन्तरं सदस्याः कर्तारं स्पृष्ट्वा स्तृणन्ति । सदस्याभावेऽन्ये ब्राह्मणा वा । केषांचिदभावे कर्ता स्वयमेव स्तृणाति । कथम् । ईशानकोणादारभ्य वायव्यकोणान्तं

---

1 वनस्पतयः PS 5.16.3cd 1 बृहस्पतिर्ब्रह्मा GB 2.1.1; KauśS 3.8, 137.40

---

2 मन्त्रानेकस्वरेण Cf. p. 53.

8–9 Cf. Vyākaraṇamahābhāṣya, Paspaśāhnika 4.3 (vol. I, p. 2, l. 11–12): दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥

---

1 बृहस्पतिर्ब्रह्मेत्यृक्] Ku, बृहस्पतिब्रह्मेत्यृक् Ni, बृहस्पतिब्रह्मे इत्यृक् Gu$_1$, बृहस्पर्बह्मेत्यृक् Gu$_2$
1 °स्वरेण] NiKuGu$_1$, °स्वरेणे Gu$_2$
2 °स्वरेणेति] NiKuGu$_2$, °स्वरेणति Gu$_1$
2 वचनात्] KuGu$_1$Gu$_2$, वचनानात् Ni
3–4 मन्त्रा °°° कर्मसु] This verse (which occurred previously in this chapter, p. 53) is omitted here in Gu$_1$
3 °वाचने] NiKu, lac. Gu$_1$, °वाचके Gu$_2$
5–6 स्वरेणोदात्तकेन °°° श्रुतिपाठः] corr., स्वरेणोदात्तकेन वै । तेदेकश्रुतिपाठः Ni, स्वरेणोदात्तकेन वै ॥ तदेवः श्रुतिपाठ Ku, स्वरेणोपदेवश्रुतिपाठः Gu$_1$, स्वरेणोदात्तकेन वै ॥ तदेकः श्रूतिपाठ Gu$_2$
6 स्याद्युज्यते] NiGu$_1$Gu$_2$, स्याद्युज्यातो Ku
6 वाचनादिषु] NiKu, वाचनादिषुति Gu$_1$, वचनादिषु Gu$_2$
8 स्वरतो] KuGu$_1$Gu$_2$, स्वरेतो Ni
8 वर्णतो] KuGu$_1$Gu$_2$, om. Ni
8 तमर्थमाह] NiGu$_1$Gu$_2$, चमर्थमाह Ku
9 वाग्वज्रो] NiKuGu$_1$, वाग्व{तो}क्त्रो Gu$_2$
9 यजमानं] NiKu, यक्रमानं Gu$_1$, यजमान Gu$_2$
9 यथेन्द्रशत्रुः] NiKu, तथेन्द्रशत्रुः Gu$_1$, यथेन्द्रतुः Gu$_2$
10 सदस्याः कर्तारं स्पृष्ट्वा] NiKuGu$_2$, सन्दस्यास्तदन्वाल{ध्व}ब्धेन Gu$_1$
10 सदस्याभावेऽन्ये] NiGu$_2$, सदस्याभावेऽन्यत्र Ku, अन्य Gu$_1$
11 केषांचिदभावे] NiKu, अभावे Gu$_1$, केषाचिदभावेऽने ब्राह्मणा वा ॥ केषचिदभावे Gu$_2$
11 कर्ता स्वयमेव] NiKuGu$_2$, स्वयं वेदिं Gu$_1$
11 स्तृणाति] KuGu$_2$, स्तृणान्ति Ni, परिस्तृणाति Gu$_1$
11 कथम्] NiKuGu$_2$, कथं स्तृणाति Gu$_1$

पूर्वोत्तराग्राभ्यां द्वौ द्वौ कुशपत्रेणाविच्छिन्नम् । एवं त्रिः पञ्च सप्तावृतं वेति स्तृणाति । अयुग्मोपलक्षणमेतत् । यजमानस्य कामसम्पत्तयेऽग्निं परिस्तृणीयुरिति ।

तदनन्तरं बर्हिःशेषैः किंचित्कुशैः शान्त्युदकाङ्गतया ब्रह्मणि स्थापिते । इदानीं Ni 23v
तन्त्रस्य पूर्वाङ्गत्वेन पुनर्ब्रह्मपात्रस्थापितुं विष्टरासनं कल्पयित्वा । ब्रह्मपात्रं तु ताम्ब्रेणैव कार्यम् । परिभाषायाम् ।

> ब्रह्मपात्रमिति ख्यातं ताम्ब्रेण कृतमक्षयम् ।
> मूढोऽपि नान्यतः कुर्यात्सर्वं तन्निष्फलं भवेदिति ॥

वचनात्ताम्ब्रेणैव कर्तव्यमिति । पूर्ववदिममासादमित्यादि ब्रह्मजपान्तं कर्म करोति । Gu$_2$ 26v
कश्चिदेवं कर्म न स्पृहयति ।

ततः कर्ता पातं मा द्यावापृथिवी अद्याह्न इत्येतावता मन्त्रेण पृथक्पृथक् द्यावा-

---

10 पातं मा द्यावापृथिवी अद्याह्नः KauśS 137.41 (em. BLOOMFIELD 1902: 514)

---

2 यजमानस्य कामसम्पत्तये परिस्तृणीयुः Unidentified.
8 इममासादमित्यादि ब्रह्मजपान्तं कर्म Cf. pp. 71–73.

---

1 पूर्वोत्तराग्राभ्यां] NiKuGu$_1$, पूर्वोत्तराभ्यां Gu$_2$
1 °पत्रेणाविच्छिन्नम्] NiKuGu$_1$, °पत्राविछिन्न Gu$_2$
1 त्रिः पञ्च सप्तावृतं वेति] NiKu, द्विरावृतं त्रिरावृतं पञ्चावृतं सप्तविति वा Gu$_1$, त्र पञ्च सप्तावृतं वेति Gu$_2$
2 यजमानस्य] em., यजमानश्च NiKuGu$_1$Gu$_2$
2 कामसम्पत्तये] Ku, कामसम्पत्तपे Ni, कामसम्पतये Gu$_1$, कामसमपत्राये Gu$_2$
2 परिस्तृणीयुरिति] corr., परिस्तृणीपुरिति Ni, परिस्तृणीरिति Ku, परिस्तृणीयुरिति श्रुतिः Gu$_1$, परिस्तृणीयरिति Gu$_2$
3 किंचित्कुशैः] Ku, किञ्चिकुशैः NiGu$_2$, किञ्चत्कुशैः Gu$_1$
3 शान्त्युदकाङ्गतया] KuGu$_1$Gu$_2$, शान्त्युदकाङ्गतप्रा Ni
3 ब्रह्मणि] NiGu$_1$Gu$_2$, तत्पात्रब्रह्मणि Ku
4 तन्त्रस्य] Gu$_1$Gu$_2$, मन्त्रस्य NiKu
4 पुनर्ब्रह्म°] NiKuGu$_1$, र्ब्रह्म° Gu$_2$
4 °स्थापितुं] Gu$_1$Gu$_2$, °स्थापितं NiKu
4 विष्टरा°] NiKuGu$_2$, वष्टरा° Gu$_1$
4 तु] NiKuGu$_2$, om. Gu$_1$
4 ताम्ब्रेणैव] Ni, ताम्ब्रैणैव Ku, तामन्द्रेणैव Gu$_1$, ताम्रेणैव Gu$_2$
6 ब्रह्मपात्र°] KuGu$_1$Gu$_2$, ब्रह्मपत्र° Ni
6 ख्यातं] NiKuGu$_1$, ख्यान्तं Gu$_2$
6 ताम्ब्रेण] KuGu$_1$, ताम्ब्रपात्रेण Ni, ताम्रेण Gu$_2$
7 कुर्यात्सर्वं तन्निष्फलं] NiGu$_1$, कृत्वात्सर्वं तं निष्फलं Ku, कुर्यात्सर्वन्तं निस्फलं Gu$_2$
8 वचनात्ताम्ब्रेणैव कर्तव्यमिति] NiKu, वचनादवस्यं ताम्ब्रपात्रं कार्यं Gu$_1$, वचनाताम्रेणैव कर्त्तव्यमितिः Gu$_2$
9 कश्चिदेवं] NiGu$_1$Gu$_2$, कश्चिवेदं Ku
9 स्पृहयति] em., स्पृहयन्ति NiGu$_1$, स्पृहन्ति Ku, स्पृहयंति Gu$_2$
10 ततः कर्ता पातं] NiKuGu$_2$, om. Gu$_1$
10 अद्याह्न] NiKuGu$_2$, अद्यान्न Gu$_1$
10 पृथक्पृथक्] NiKuGu$_1$, पृथक् Gu$_2$

पृथिव्यौ समीक्षते । लोककृतावित्यवसानेन सभ्यावसथ्यावीक्षते । सभ्यावसथ्याविति सत्रिणां गृहेऽग्निविशेष इति । तयोरभावे मनसा ध्यायन् जपमेव कुर्यात् ।

तत ऋषीणां प्रस्तर इत्यवसानेनाग्नेः पश्चिमप्रदेशे पूर्वस्थापितपरिग्रहाभिधान-कुशमुष्टिसीतालक्षणकृतकुशसमिधोपरि प्रस्तरसंज्ञं कुशगुच्छं दक्षिणमूलकं संस्थाप्य । तस्मिन् प्रस्तरोपरि समिदाज्यादिहवींष्यासादयति । यैः कर्मणि यैः प्रयोजनमस्तीति ।

अथ हवींष्याह परिभाषायाम् ।

Ku 26r, Gu$_1$ 28v

आचार्याः प्राहुः सप्त हवींष्यत्र भवन्ति वै ।
आज्यं समित्पुरोडाशः पूर्णहोम उदौदनः ।
क्षीरौदनः पशुश्चैव हविराख्यास्तु सप्त वै इति ॥

अथ प्रस्तरस्य स्तरणमाहात्म्यं वक्ष्यति ।

हूयमानस्य हविषो यत्पतेत्प्रस्तरोपरि ।
हुतं तदपि जानीयाद्धोतव्यः प्रस्तरो यत इति ॥

---

1 लोककृतौ Unidentified (cf. TS 1.1.12.1g, VaitS 18.14 etc.). The *sakalapāṭha* is given in PVSP, p. 82 (emended): लोककृतौ लोकं मे कृणुतं मा मा हिंसिष्टं पाप्मानं पाप्मा मे शिवो भवतु मध्यमः । 3 ऋषीणां प्रस्तरः PS 18.45.1

---

1 °कृतावित्यव°] em., °कृता इत्यव° NiGu$_1$, °कृतादित्यव° Ku, °कृतेत्यव° Gu$_2$
1 सभ्यावसथ्यावीक्षते] Ku, सद्यावसथ्यावीक्षते Ni, सभ्यावसथ्यौ समीक्षते Gu$_1$, सभ्यावश{●}थ्यावीक्षते Gu$_2$
1–2 सभ्यावसथ्याविति सत्रिणां गृहेऽग्निविशेष इति] NiKuGu$_2$, सभ्यावसथ्यौ इति सत्रिणां पश्चाग्नीनां मध्येऽग्निविशेषः Gu$_1$
2 तयोरभावे] NiGu$_1$Gu$_2$, तभावे Ku
3 तत] NiKuGu$_2$, तत्र Gu$_1$
3 प्रस्तर] NiKuGu$_2$, प्रस्तत्रृषि Gu$_1$
4 °कुशमुष्टि°] em., °कुशमुष्टिः NiGu$_1$, °कुशमुष्टीः Ku, °कशमुष्टिः Gu$_2$
4 °समिधोपरि] NiGu$_1$Gu$_2$, °समिधोपरिग्रह Ku
4 प्रस्तरसंज्ञं] NiKu, प्रस्त्रसंज्ञं Gu$_1$, प्रस्तरसंज्ञक Gu$_2$
4 कुशगुच्छं] NiKu, कुशगुछिं Gu$_1$, कुशपूछं Gu$_2$
4 दक्षिणमूलकं] NiKu, दक्षिणमूलं Gu$_1$Gu$_2$
5 समिदाज्यादि°] Gu$_1$, समिदाज्याद° Ni, समिदाज्या° KuGu$_2$
5 °सादयति] NiKuGu$_1$, °सादयन्त Gu$_2$
5–9 यैः °°° सप्त वै इति] Gu$_1$ arranges this passage differently: हवींषि सप्तप्रकारा भवन्ति ॥ आचार्याः प्राहुः सप्त हवींष्यत्र भवन्ति वै ॥ आज्यं समित्पुरोडाशः पूर्णहोमे उदौदनः । क्षीरोदनः पशुश्चैव हविराख्यास्तु सप्त वै इति परिभाषायां ॥ ॥ यैः कर्मणि यैः प्रयोजनमस्ति ॥
5 प्रयोजनमस्तीति] NiGu$_1$, प्रयोनमस्तीति Ku, प्रयोजनस्त्रिति Gu$_2$
7 प्राहुः] NiKuGu$_1$, प्रादुः Gu$_2$
7 हवींष्यत्र] NiKuGu$_1$, हवींष्यत Gu$_2$
8 °त्पुरोडाशः] NiKuGu$_1$, °त्पुरोताश ॥ Gu$_2$
9 हविराख्यास्तु] NiGu$_1$, हविख्याःतु Ku, हविरा{क्षा}ख्या तु Gu$_2$
10 अथ] NiKuGu$_2$, om. Gu$_1$
10 प्रस्तरस्य] NiKuGu$_2$, प्रस्तस्य Gu$_1$
10 स्तरणमाहात्म्यं] NiGu$_1$, माहात्म्यं Ku, {त}स्तरणंमहात्म्यां Gu$_2$
11 हूयमानस्य] em., हूयमानेन NiKuGu$_1$Gu$_2$
11 यत्पतेत्प्रस्तरोपरि] Ni, यत्पतेप्रस्तरोपरि KuGu$_2$, यत्पतेप्ररस्तरोपरि Gu$_1$

ततो हावको यज्ञस्य सन्ततिरसीति दशभिः कल्पजाभिर्वेदेर्बहिरुत्तरभागे वायव्य- कोणादारभ्यापराजितां दिशं यावदविच्छिन्नेनायुग्मैः प्रागग्रैर्दर्भैः सुसंस्कृतैः सदस्यैः स्तृणाति । अन्ये श्रोत्रिया वा स्वयं वेति । तथा च पैठीनसिः । Gu₂ 27r

निधायाधः परिग्राहं हविषामुत्तरंस्ततः (?) ।
संदध्यादुत्तरं भागं सन्ततेऽथापराजित इति ॥

यन्मे छिद्रमित्यृचा ताम्रगलन्तिकानालगलिताविकलजलधारां सन्तानस्योपरि नयेत् ।

अनन्तरं प्रस्तरात्पश्चिमे वेदिसन्निधाने होतुरासनं कम्बलादिना कल्पयेत् । सर्व- सिद्धिस्तु कम्बल इति वचनात् । तदुपरि उत्तराग्रा दर्भा दातव्याः । तथा च पैठीनसिः ।

प्रस्तरात्पश्चिमेनैव कल्पयेद्धोतुरासनम् ।
तस्योपरि कुशान् दद्यात् संस्कृतान् शेषबर्हिष इति ॥

---

1 यज्ञस्य सन्ततिरसि AthPrāy 1.3:76.3–6. At PVSP, p. 83, these mantras are cited in nearly identical form. 6 यन्मे छिद्रम् PS 19.38.6

---

7–8 सर्वसिद्धिस्तु कम्बलः Unidentified.

---

2 °च्छिन्नेनायुग्मैः] NiGu$_2$, °छेन्नेनायुग्मैः Ku, °छन्नेनायुग्मैः Gu$_1$
2 प्रागग्रैर्दर्भैः] NiGu$_1$, प्रागग्रैर्दर्भः Ku, प्रागग्रैर्दर्भै Gu$_2$
2 सुसंस्कृतैः] NiKuGu$_1$, ससंस्कृतैः Gu$_2$
3 स्तृणाति] NiKuGu$_2$, स्तृणीत Gu$_1$
3 श्रोत्रिया] Gu$_1$, श्रोत्रियो NiKuGu$_2$
4 हविषामुत्तरंस्ततः] NiKuGu$_1$, हविस्याषुत्तरं{त}स्ततः Gu$_2$
5 संदध्यादुत्तरं] Ni, सन्दध्यादुत्तरं KuGu$_1$, सन्दधातुत्तरं Gu$_2$
5 सन्ततेऽथा°] em., सन्तिष्टेऽथा° NiKuGu$_1$, संतिष्ठेष्ठ° Gu$_2$
5 °पराजित] NiKuGu$_2$, °पराजिते Gu$_1$
6 °गलन्तिकानालगलिताविकल°] NiKuGu$_1$, °चालन्तिकानालातालिताविगल° Gu$_2$
6 सन्तान°] NiGu$_1$Gu$_2^{pc}$, सन्धान° Ku, सन्ध्यान Gu$_2^{ac}$
7 अनन्तरं] NiGu$_2$, अनन्तं Ku, ततः Gu$_1$
7 कम्बलादिना] KuGu$_1$Gu$_2$, कम्बला Ni
7–8 सर्वसिद्धि °°° वचनात्] NiKu, om. Gu$_1$, सर्वसिधिस्तु कम्बले इति वचनात् Gu$_2$
8 दर्भा] KuGu$_1$Gu$_2$, om. Ni
8 दातव्याः] NiKuGu$_2$, तादातव्याः Gu$_1$
8 पैठीनसिः] NiKuGu$_1$, पठीनसि Gu$_2$
82.9–83.1 प्रस्तरात्पश्चिमेनैव °°° चोपविश्य] This passage is not found in Ni
10 संस्कृतान्] Gu$_1$Gu$_2$, lac. Ni, संस्कृता Ku
10 °बर्हिष] KuGu$_1$, lac. Ni, °बर्हिषा Gu$_2$

तदुपरि कर्ता चोपविश्य । सव्ये पार्श्वे इति कल्पजाभ्यामृग्भ्यां कुशबन्धनरज्जुमन्यैर्बर्हिभिः पूर्वाग्रैरुत्तराग्रैर्वा प्रच्छाद्य वेदेर्दक्षिणत उत्तराग्रं निदधाति । न पितृयज्ञे । तथोदपात्रमिति कल्पजाभ्यामृग्भ्यामग्नेर्नैर्ऋतकोणे वेदेरन्तर्वर्तित्वान्नाम्नान्तरमुदपात्रं पर्युक्षणहेतुत्वात् नाम्ना पर्युक्षणं वा वेद्यामेव स्थापयति । तथा च पैठीनसिः ।

> पर्युक्ष्यन्ते च तेनैव द्रव्याणि च हवींषि च ।
> Ku 26v तद्वै पर्युक्षणं पात्रं तच्चैवान्तरमुच्यत इति ॥

---

1 सव्ये पार्श्वे Unidentified. The *sakalapāṭha* is given in PVSP, p. 84 (corrected): सव्ये पार्श्वे निदधाम्येतद्बर्हिषदः सन्नहनं पुरस्तात् । उत्तानायाः प्राङ शयानायाः सव्यं पार्श्वं दक्षिणतो नि बोधत ॥ १ ॥ तथा हि ग्रन्थिं ग्रथ्नन्तु वेधसस्तथा दृश्यन्ते प्रमदा गूहमानाः । प्रशोध्य प्राञ्चं निबध्नामि प्राञ्चं तथा विदुर्विदुषो ये मनीषिणः ॥ २ ॥ 3 तथोदपात्रम् KauśS 3.2–3; according to the *sakalapāṭha* given in PVSP, the second half of the second stanza runs differently from the reading given at KauśS 3.3 (where it starts with आपः समुद्रो). Cf. p. 84, corrected: तथोदपात्रं धारय यथाग्रे ब्रह्मणस्पतिः । सत्यधर्मा अदीधरद्देवस्य सवितुः सवे ॥ १ ॥ इहैत देवीरमृतं वसाना हिरण्यवर्णा अनवद्यरूपाः । ऋतेन पूर्णममृतस्य पात्रमास्मिन् यज्ञे ब्रह्मणा धारयामि ॥ २ ॥ See the next *pratīka*.

---

1–6 सव्ये पार्श्व °°° मुच्यत इति ॥] Gu$_1$ and Gu$_2$ arrange this passage differently. The Gu$_1$ reading is presented here with variants from Gu$_2$ in parentheses: ततः सव्ये पार्श्व इति द्वाभ्यामृग्भ्यां (°भ्यांमृगभ्यां) कुशबन्धनरज्जुमन्येन (°मनेन) बर्हिषा प्रागग्रेऋदगग्रैर्वानुप्रछाद्य (प्रगग्रैऋदमग्रैर्वानु°) निधातीति ॥ (निदधाति ॥ न पितृयज्ञ निदधाति ॥) तथोदपात्रमिति कल्पजाभ्यामृग्भ्यामग्ने नैर्ऋतकोणे (°भ्यांमृग्भ्यां आग्नेर्नै°) होश्चाग्नेयकोणे (होतुश्चाग्नय°) वेद्यां अन्तरोदपात्रसंज्ञंकं (वेद्यान्तारोदपात्रं सज्ञ) अग्न्यादिपर्युक्षणार्थं (°क्षणार्थ) निदधाति ॥ तथा च पैठीनसि ॥ पर्युक्षते च तेनैव द्रव्याणि च हवींसि (हविस्य) च । तद्वै (ततद्वै) पर्युक्षणं पात्रं तच्चैवान्तरमुच्यते इति ॥ (om. इति). Ni and Ku place the verse immediately before the first *pratīka*. We retain most of the wording as found in Ni and Ku, but follow Gu$_1$ and Gu$_2$ in the placement of the verse and its attribution to Paiṭhīnasi.
1 कल्पजाभ्यामृग्भ्यां] NiKu, द्वाभ्यामृग्भ्यां Gu$_1$, द्वाभ्यांमृगभ्यां Gu$_2$
1–2 कुशबन्धनरज्जुमन्यैर्बर्हिभिः] corr., कुशस्तं बन्धनरज्जुमन्यैर्बर्हिभिः Ni, कुशबन्धनरज्जुमन्यैर्बर्हिः Ku, कुशबन्धनरज्जुमन्येन बर्हिषा Gu$_1$, कुशबन्धनरज्जुमनेन बर्हिषा Gu$_2$
2 पूर्वाग्रैरुत्तराग्रैर्वा प्र°] corr., पूर्वाग्रऋत्तराग्रैर्वा प्र° Ni, पूर्वोत्तराग्रैर्वा प्र° Ku, प्रागग्रेऋदगग्रैर्वानुप्र° Gu$_1$, प्रगग्रैऋदमग्रैर्वानुप्र° Gu$_2$
2 वेदेर्दक्षिणत उत्तराग्रं] NiKu, om. Gu$_1$Gu$_2$
2 निदधाति] NiKuGu$_2$, निधातीति Gu$_1$
2 न पितृयज्ञे ।] NiKu, om. Gu$_1$, न पितृयज्ञ निदधाति ॥ Gu$_2$
3 °भ्यामृग्भ्यामग्नेर्नैर्ऋत°] Ku, °भ्यामृग्भ्यामाग्नेर्नैर्ऋत° Ni, °भ्यामृग्भ्यामग्ने नैर्ऋत° Gu$_1$, °भ्यांमृगभ्यां आग्नेर्नैर्ऋत° Gu$_2$
3 वेदेरन्तर्वर्तित्वान्नाम्नान्तरमुदपात्रं] em., वेदेरन्तर्वर्तित्वानाम्नान्तरमुदपात्रं Ni, वेदेऋत्तरर्वर्त्तित्वानाम्नान्तरोदपात्रं Ku, alt. Gu$_1$Gu$_2$
4 तथा च पैठीनसिः ।] Gu$_1$Gu$_2$, om. NiKu
5 पर्युक्ष्यन्ते] em., पर्युक्ष{•}तन्तते Ni, पयुर्क्षते KuGu$_1$Gu$_2$
5 तेनैव] KuGu$_1$Gu$_2$, नैव Ni
5 हवींषि] NiKu, हवींसि Gu$_1$, हविस्य Gu$_2$
6 तद्वै] NiKuGu$_1$, ततद्वै Gu$_2$
6 तच्चैवान्तर°] NiGu$_1$Gu$_2$, च्चैवान्तर° Ku

ततः कर्तोत्थाय वेद्यामुत्तरेण निष्क्रम्य । प्रदक्षिणं वेदेर्दक्षिणतो गत्वा वेदेर्बहिरग्नि-कोणे स्तरणकुशाभ्यन्तरे जाग्मायनमुदपात्रं समुद्र इति संज्ञं आपः समुद्र इत्यादि ब्रह्मणा स्थापयामीत्येवमन्तैरुत्तराभिमुखं पूर्वाभिमुखं वा स्थापयति । तथा च पैठीनसिः ।

होतुश्चाग्नेरुत्तरतः किंचिद्दक्षिणतो न्यसेत् ।
जाग्मायनं ततः कोणे वेदेर्दक्षिणपूर्वक इति ॥ Ni 24v

तत उत्थितवान् कर्ताहे दैधिषव्य इत्यवसानेन ब्रह्मणो हविषः स्वस्य प्रत्यासादं यथाक्रमं मन्त्रं पठित्वा ईक्षते । एवं मन्त्रस्य त्रिरावृत्तिर्भवति । केचित्सकृत्पठितेन मन्त्रेणात्मासादं पश्यतीति । आसादस्तु स्वस्मिन्नित्यात्मासाद आसनम् ।

ततो होता निरस्यामि पराग्वसुमिति त्रिभिरवसानैर्ब्रह्महविःस्वस्मादासादाद्यथा-क्रमं मन्त्रपठितैः सव्येन हस्तेन यथास्थानं कुशान्यादाय । य एनस्वीत्यृचमुक्त्वा दक्षिणा- Ku 27r

2–3 आपः समुद्रः ◦◦◦ ब्रह्मणा स्थापयामि For the *pratīka*, cf. KauśS 3.3 (and the preceding *pratīka*); but the combination with what follows is not traceable in that text. The *sakalapāṭha* is given in PVSP, pp. 84f. (corrected): आपः समुद्रो वरुणोऽस्य राजा संस्रावभागा इह मादयन्ताम् । इन्द्रप्रशिष्टा वरुणप्रसूता आपः समुद्राच्छ्रियमावहन्तु ॥ १ ॥ महोदधिं दक्षिणतः समुद्रमिमं पृथिव्यां ब्रह्मणा दधामि । तमायान्त्वापो मधुमतीः पुरस्ताच्छुद्धाः पूता यज्ञिया अध्वरं नः ॥ २ ॥ ध्रुवमसि ध्रुवं मे भूयाः । अच्युतमसि अच्युतं मे भूयाः । अक्षितमसि अक्षितं मे भूयाः । अमृतमसि अमृतं मे भूयाः । अपरिमितमसि अपरिमितं मे भूयाः । ध्रुवाच्युताक्षितामृतापरिमितानि योगक्षेमैः प्रजया पशुभिर्गृहैर्धनेन । अपां पूर्णमिदं पात्रमस्मिन् यज्ञे ब्रह्मणा स्थापयामि ॥ 6 अहे दैधिषव्य KauśS 3.5 9 निरस्यामि पराग्वसुम् Cf. KauśS 3.6. The *sakalapāṭha* is given at PVSP, pp. 85f. (corrected): निरस्यामि पराग्वसुं सह पाप्मना यो मे यज्ञे वितते निविष्टः । निरस्तः पराग्वसुः सह पाप्मना निरस्तः सोऽस्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । ब्रह्मासादान्निरस्यामि ॥ १ ॥ ◦◦◦ हविरासादान्निरस्यामि ॥ २ ॥ निरस्यामि पराग्वसुः सह पाप्मना यो मे यज्ञे वितते निविष्टः । निरस्तः पराग्वसुः सह पाप्मना निरस्तः सोऽस्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । स्वस्मादासादान्निरस्यामि ॥ ३ ॥ 10 य एनस्वी PS 7.3.6

1 कर्तोत्थाय ] NiKuGu$_1$, उथाय कर्त्त Gu$_2$
1 वेद्यामुत्तरेण ] NiKuGu$_1$, वेद्या उत्तरेण Gu$_2$
1 प्रदक्षिणं ] NiKu, om. Gu$_1$, प्रक्षिणं Gu$_2$
2 स्तरण◦ ] NiKuGu$_1$, om. Gu$_2$
2 जाग्मायनमुदपात्रं ] KuGu$_2$, जाॅग्मायनमुदपात्रं Ni, जाग्मायनपात्रं Gu$_1$
3 ◦मन्तैरुत्तराभिमुखं ] em., ◦मन्त्रैऋत्तराभिमुखं NiKu, ◦मन्त्रैऋदपात्रं उत्तराभिमुखं Gu$_1$, ◦मन्त्रैर्मन्त्रैऋत्तराभिमुखं Gu$_2$
3 तथा च ] NiKuGu$_2$, om. Gu$_1$
4 किंचिद्दक्षिणतो ] NiKu, किंचिदक्षिणतो Gu$_1$, किचिदक्षिणतो Gu$_2$
5 जाग्मायनं ◦◦◦ पूर्वक इति ॥ ] om. Gu$_2$
5 जाग्मायनं ] KuGu$_1$, जाग्मार्दयनं Ni, lac. Gu$_2$
6 ब्रह्मणो ] NiGu$_1$Gu$_2$, ब्रह्मणे Ku
6 प्रत्यासादं ] NiKuGu$_2$, पत्यासादं Gu$_1$
7 मन्त्रं ] NiKu, मन्द्रं Gu$_1$, मन्त्र Gu$_2$
8 स्वस्मिन्नित्यात्मासाद ] em., स्वस्मिन्नत्यासाद Ni, स्वसनित्यासाद्यि Ku, स्वस्मिन्नित्यासाद Gu$_1$Gu$_2$
9 ततो ] NiKuGu$_1$, ततः Gu$_2$
9 ◦रवसानैर्ब्रह्महविः◦ ] corr., ◦रवसानैर्ब्रह्मविः◦ Ni, ◦रवसानैर्ब्रह्माहविः◦ Ku, ◦र्वसानैर्ब्रह्महवि◦ Gu$_1$, ◦रवसानैब्रह्महवि◦ Gu$_2$
9–10 स्वस्मादासादाद्यथाक्रमं ] em., स्वस्मादासादैर्यथाक्रमं Ni, स्वस्मादासादैर्यथाक्रमं Ku, स्वस्मादासादैःर्यथाःक्रमं Gu$_1$, स्त्वस्मादामादैयथाक्रमं Gu$_2$
10 मन्त्रपठितैः ] NiGu$_1$, मन्त्रं पठित्वा तैः Ku, मन्त्रं पठितैः Gu$_2$
10 कुशान्यादाय ] NiKuGu$_2$, कुशान्नादाय Gu$_1$

भिमुखो कुशान् नैर्ऋतकोणं परिक्षिपेत् ।

ततः कर्ता हस्तौ प्रक्षाल्य । यामाहुर्नावमिति चतसृभिः कल्पजाभिर्वेद्यामुत्तरतः प्र-
Gu$_1$ 29v विश्य । तेनैवोत्तरमार्गेण हविःस्थानाद्युपमर्दनेन दक्षिणचरणादि वेदिं प्रविशेत् । यदा
Gu$_2$ 28r यदा प्रवेशनिर्गमौ भवतस्तदा तदा चोत्तरेणैव । वेदेरुत्तरतो द्वार इति श्रुतिवचनात् ।
ततो होता इदमहमर्वाग्वसोः सदने सीदामीत्यादिना अनभिशोकमित्यन्तैर्मन्त्रैर्विमृग्व-
रीमित्यृचा च पूर्वोपकल्पितासने प्राङ्मुख उपविशेत् । ततो यजमानः शुचिः शुक्लवासाः
कर्तोत्तरतः प्राङ्मुख उपविश्य । अग्नेर्दक्षिणपार्श्वे यजमान इति । तथा च श्रुतिः ।

स दक्षाणां दक्षपतिर्बभूवाञ्जन्ति यं दक्षिणतो हविर्भिरिति

मन्त्रलिङ्गात् । ततः कर्ता तं शान्त्युदकेनाचमनाभ्युक्षणं कारयित्वा । ततः कर्ता मन्त्र-

---

2 यामाहुर्नावम् Unidentified. The *sakalapāṭha* is given in PVSP, pp. 85f. (corrected): यामाहुर्नावं रजस्तरित्रीं शतारित्रां स्वस्तये । सा नो देव्युत्तरतः प्रशस्तं द्वारं दधातु सुमन्यमाना ॥ १ ॥ येषां देवानां सदनं रयीणां वेद्यामध्वरे तायमाने । ते नो देवाः पान्त्वस्मानस्मिन् यज्ञे बर्हिषा निषद्य ॥ २ ॥ वेद्या द्वारं अवापृणोत्यादित्यादित्यः सह जातवेदसा । वेदिर्लोकान् विचक्रमे वेद्यां यज्ञो वितन्वते ॥ ३ ॥ इदं द्वारं प्रविशामि वेद्या ब्रह्मणा कृतम् । आयुष्मन्तः प्रजया वर्धमानाः स्योना भवेम सुभगा सुवीराः ॥ ४ ॥ 5 इदमहमर्वाग्वसोः सदने सीदामि °°° अनभिशोकम् KauśS 3.7 (the PVSP, p. 86, and KS/Gu$_1$ give somewhat expanded and rather heavily corrupt versions of the same) 5–6 विमृग्वरीम् PS 17.3.8

---

4 वेदेरुत्तरतो द्वार Cf. the *kalpajā śruti* in a verse cited on p. 57; note divergent *pratīka*s.
8 This is PS 8.14.6cd.

---

1 °मुखो कुशान् नैर्ऋतकोणं] Ni, °मुखो न्नैर्ऋतकोणं Ku, °मुखो कुशानैर्ऋतकोणं Gu$_1$, °मुखो कुषानैऋतकोणे Gu$_2$
2 यामाहुर्नावमिति] Ku, यामाहुर्नादमिति Ni, ततो यामाहुर्नावमिति Gu$_1$, जामाहुर्नावमिति Gu$_2$
2 °मुत्तरतः] NiKuGu$_2$, °मुत्ततः Gu$_1$
3 हविःस्थानाद्युपमर्दनेन] Gu$_1$, हविःस्थानान्युपमर्दनेन NiGu$_2$, हविस्थानान्युपगमदिनेन Ku
3–4 यदा यदा] NiKuGu$_2$, यदा Gu$_1$
4 °निर्गमौ भवतस्तदा] NiKuGu$_2$, °निनिर्गमौर्भवतस्तदा Gu$_1$
4 श्रुतिवचनात्] NiKuGu$_2$, वचनात् Gu$_1$
5 ततो] NiKuGu$_1$, om. Gu$_2$
5 °शोक°] Gu$_1$, °श्लोक° NiKuGu$_2$
5–6 °र्विमृग्वरी°] Ku, °र्विमग्वरी° Ni, °विग्र्वरी° Gu$_1$, °र्विमृ{●●}ग्वरि° Gu$_2$
6 पूर्वोप°] NiKu, पूर्वो° Gu$_1$, पुर्वोपरि° Gu$_2$
6 प्राङ्मुख उपविशेत्] em., प्राङ्मुखोपविशेत् NiKuGu$_1$Gu$_2$
7 कर्तोत्तरतः] NiKuGu$_1$, कर्त्तुर्ऋत्तरतः Gu$_2$
7 °ख उपविश्य] em., °खोपविश्य NiKuGu$_1$Gu$_2$
8 दक्षाणां] em., यक्षाणं Ni, क्षक्षाणां Ku, यक्षाणा Gu$_1$, यक्षाणां Gu$_2$
8 दक्षपतिर्बभूवाञ्जन्ति] em., यक्षपतिर्वभूवानयन्ति Ni, दक्षपत्रिर्वभूवानयन्ति Ku, यक्षपतिर्वभूवान् यन्ति Gu$_1$, यक्षपतिर्बभूवान् यंन्ति Gu$_2$
8 दक्षिणतो हविर्भिरिति] NiKuGu$_1$, दक्षिणंतो हविभि इति Gu$_2$
9 °केनाचमना°] NiKuGu$_2$, °काचमन्ना° Gu$_1$

व्यतिरेकेण उत्तरवेदिपूर्वकृतदर्भकोष्ठीं प्रधानवेदेर्बहिरपनयेत् । Ni 25r

ततो हावक अद्भिष्ट्वा परि णयामीति कल्पजर्चा अन्तरोदपात्रजलेनाग्निं त्रिः पर्युक्ष्य । केचित्सकृदिति । विधिशौचोक्त-अपर्युक्ष्येति वचनादवश्यं पर्युक्ष्येति । Ku 27v, Gu$_1$ 30r

समास्त्वाग्न इति सूक्तस्य ॐ सप्तर्षयो ऋषयस्त्रैष्टुभं छन्दः अग्निर्देवता समिद्धोमे विनियोग इति स्मृत्वा । समास्त्वाग्न इति कण्डिका । त्वं नो अग्ने अग्निभिरित्यृचा । ॐ बृहस्पतिर्ऋषिस्त्रैष्टुभं छन्दः अग्निर्देवता समिद्धोमे विनियोग इति ज्ञात्वा । ममाग्ने Gu$_2$ 28v वर्च इति सूक्तं च वामभुजगृहीतकुशमुष्ट्या यजमानमन्वालभ्य पद्मासनस्थ एतैर्मन्त्रैः प्रत्यृचं समिद्धोमं कुर्यात् । एता द्वाविंशति समिदाहुतयोऽग्नये । एकां समिधमित्येके । परिभाषायाम् ।

> होमकर्मणि ये चोक्ताः प्रत्यृचं होमयेत्तु तान् ।
> विशेषं यत्र तु ब्रूयात् कुर्यात्तत्र भवन्ति वै ।
> क्रियमाणानुवादिनो यत्र तत्र भविष्यति ॥

इति वचनात्सूक्तानुवाकगणादिभिर्होमो यदा भवति तदैवं प्रत्यृचं होमं कुर्यात् । न पुनः सूक्तादिसमाप्ताविति । यत्र तु विशेषवचनं भवति द्वाभ्यामृग्भ्यां बहुभिर्ऋग्भिर्वा एकामाहुतिं जुहुयादिति तत्र तत्रैव भवति नापरे ।

---

2 अद्भिष्ट्वा परि णयामि For the identification of this *pratīka*, cf. the note on p. 63
4 समास्त्वाग्ने PS 3.33 5 त्वं नो अग्ने अग्निभिः PS 3.34.8 6–7 ममाग्ने वर्चः PS 5.4

---

3 अपर्युक्ष्य Cf. p. 63.

---

1 °कृतदर्भकोष्ठीं] Ni, °कृता दर्भकोष्ठीं Ku, °कृतदर्भकोष्ठी Gu$_1$, °कृतदर्भगोष्टि Gu$_2$
1 °वेदेर्बहिरपनयेत्] Ni, °वेदेर्बर्हिऋपनयेत् Ku, °वेदेर्बर्हिरपनयेत् Gu$_1$, °वेदिबहिरपनयेत् Gu$_2$
2 कल्पजर्चा] KuGu$_1$Gu$_2$, कर्त्ताजर्च्चा Ni
3 °कृदिति] NiGu$_2$, °कृत्विति Ku, °कृतिति Gu$_1$
3 अपर्युक्ष्येति] NiGu$_1$, अपर्युक्षेति KuGu$_2$
3 °दवश्यं] NiKuGu$_2$, °दवश्यां Gu$_1$
3 पर्युक्ष्येति] NiGu$_1$, पर्युक्षेति KuGu$_2$
4 समास्त्वाग्न इति सूक्तस्य ॐ] KuGu$_1$, ॐ Ni, श्री ॥ ॐ ॥ समास्त्वाग्न इति सूक्तस्य Gu$_2$
4 सप्तर्षयो] corr., सप्त ऋषयो NiKu, सप्तर्ऋषयो Gu$_1$, सप्त Gu$_2$
5 अग्ने अग्निभि°] NiGu$_2$, अग्नेभि° Ku, अग्नेग्निभि° Gu$_1$
7 °गृहीतकुशमुष्ट्या] KuGu$_2$, °गृहीत्वाच्च कुशमुष्ट्या Ni, °गृहीतकुशमष्ट्या Gu$_1$
7 एतैर्मन्त्रैः] NiKuGu$_1$, एतैमन्त्रैर्मन्त्रः Gu$_2$
8 एता °°° ऽग्नये ।] Gu$_1$omits this sentence
8 समिदाहुतयो] Ni, समदाज्याहुतयो Ku, lac. Gu$_1$, समिदाज्याहुतयो Gu$_2$
8 समिध°] NiKuGu$_1$, ससमिध° Gu$_2$
9 परिभाषायाम्] KuGu$_1$Gu$_2$, om. Ni
11 होमयेत्तु] NiGu$_2$, होमयन्त्यु Ku, होमयेन्तु Gu$_1$
13 कुर्यात्तत्र] KuGu$_2$, कुर्यातत्र NiGu$_1$
13 इति] NiKuGu$_2$, om. Gu$_1$
13 वचनात्सूक्तानु°] NiKuGu$_1$, वचनात् मुक्तानु° Gu$_2$
14 तदैवं] NiGu$_1$Gu$_2$, तदैव Ku
15 °माप्ताविति] NiKuGu$_1$, °माप्तविमिति Gu$_2$
15 एकामाहुतिं] NiGu$_1$Gu$_2$, कामाहुतिं Ku
15 तत्रैव भवति] NiKuGu$_2$, तत्रैर्भवति Gu$_1$

ततः कर्ता विष्णोर्योक्त्रे स्थ इति त्रिभिरवसानैः पवित्रार्थं स्थापितकुशयुगं प्रादेशमात्रं दक्षिणकरस्य तर्जन्यङ्गुष्ठाभ्यां नखवर्जिते मूले प्रच्छिद्य । तथा च विधिशौचे ।

> कुशाग्रद्वयसंयुक्तं प्रादेशं च प्रमाणतः ।
> Gu$_1$ 30v पवित्रं विहितं कार्यं घृतस्योत्पवने कृतमिति ॥

Ni 25v, Ku 28r तत आचार्यस्त्वं भूमीत्यृचा विष्णोर्मनसा पूते स्थ इति कल्पजया चान्तरोद-
Gu$_2$ 29r पात्रजलेनाविच्छिन्नधारया पवित्रं प्रक्षालयति । विष्णोर्मनसा पूतमसीत्यृचा तत्पवि-
त्रेणाज्यस्य मलान्यपकर्षयेत् । एतदेवोत्पवनमित्युच्यते । तच्च पवित्रं समिन्मध्ये कृत्वा उत्तराग्रं आज्यपात्रोपरि स्थापयित्वा तदाज्यस्थालीं प्रस्तरस्योपरि निदधाति ।

ततो हावक ॐ महर्षयो ऋषयस्त्रैष्टुभं छन्दः सूर्यो देवता आज्यस्तुतौ विनियोग इति ध्यात्वा । समुद्रादूर्मिरिति कण्डिकया व्याहृतिभिश्च उपांशुनाज्यं कृताञ्जलिपुटो भूत्वा स्तौति । अत्र व्याहृतिशब्देन महाव्याहृतयो भवन्ति । आज्यस्य लक्षणं परिभाषायाम् ।

> आज्यं पवित्राद्युत्पूतं गव्यं सुरभि सुष्टुतमिति ।

---

1 विष्णोर्योक्त्रे स्थ Unidentified. The *sakalapāṭha* is given in PVSP, p. 88: विष्णोर्योक्त्रे स्थ । तयोर्वां प्रच्छिनद्मि । प्रच्छेदा मा मार्षत । (the last sentence almost certainly needs to be emended to प्रच्छेत्ता वां मारिषम्, cf. TS 1.1.2.1 etc.) 5 त्वं भूमीम् PS 11.13.3 5 विष्णोर्मनसा पूते स्थ PS 20.45.6 6 विष्णोर्मनसा पूतमसि PS 20.45.7 10 समुद्रादूर्मिः PS 8.13

---

2 तर्जन्यङ्गुष्ठाभ्यां] em., तर्जन्याङ्गुष्ठाभ्यां NiKuGu$_1$Gu$_2$
2 °वर्जिते] NiGu$_1$Gu$_2$, °वर्जित Ku
3 प्रादेशं च प्रमाणतः] NiKu, प्रादेशप्रमाणतः Gu$_1$, प्रदेसश्च प्रमाणतः Gu$_2$
4 कृतमिति] Ku, कृत इति NiGu$_1$Gu$_2$
5 तत आचार्यस्त्वं भूमीत्यृचा] Ni, ततः आचार्यस्त्वं भुमीत्यृचा Ku, ततः आचार्यः त्वं भुमित्यृचा Gu$_1$, ततराचार्यस्त्वं भूमीरित्यृचा Gu$_2$
6 °विच्छिन्नधारया] NiKuGu$_2$, °विच्छिन्नया धारया Gu$_1$
6 पवित्रं] NiKuGu$_2$, om. Gu$_1$
6 विष्णोर्मनसा] NiKu, ततः विष्णोर्मनसा Gu$_1$, विष्णो मनसा Gu$_2$
6–7 तत्पवित्रेणा°] NiGu$_1$, पवित्रेणा° Ku, तत्पद्धित्रेणा° Gu$_2$
7 मलान्यप°] NiKuGu$_2$, मलान्युप° Gu$_1$
8 स्थापयित्वा] NiKuGu$_1$, स्थापयि Gu$_2$
8 प्रस्तरस्योपरि] NiGu$_2$, प्रस्तरोपरि Ku, प्रस्तस्योपरि Gu$_1$
10 समुद्रादूर्मिरिति] NiKuGu$_2$, समुद्रामुमिर्ममरिति Gu$_1$
10 कण्डिकया] Gu$_2$, कण्डिका NiKuGu$_1$
10 कृताञ्जलिपुटो] corr., कृताञ्जलिपुटौ NiKuGu$_1$, कृताञ्जलिः Gu$_2$
10 भूत्वा] NiKuGu$_1$, सन Gu$_2$
11 °शब्देन] NiKuGu$_1$, °शव्येन Gu$_2$
11 आज्यस्य लक्षणं परिभाषायाम्] Gu$_1$ places this sentence after the following half verse, in this form: आज्यलक्षणं परिभाषायां
11 आज्यस्य लक्षणं] Ni, आज्यस्य लक्षणस्य Ku, alt. Gu$_1$, आज्यलक्षण Gu$_2$
12 °द्युत्पूतं] NiGu$_1$Gu$_2$, °द्युत्पत्रं Ku
12 सुष्टुतमिति] NiKuGu$_2$, सुष्टुतं Gu$_1$

अथ द्रव्योपकल्पकेन स्रुवे सुप्रक्षालिते स्वहस्ते स्थापिते । होता ॐ स्रुवाय नम इति गन्धपुष्पैः संपूज्य ।

स्रुवलक्षणं यथा ।

स्रुवस्ताम्रमयः कार्यस्ताम्राभावे तु खादिरः ।
हस्तमात्रप्रमाणश्च वृत्तो द्व्यङ्गुष्ठपुष्करः ॥
गोपुच्छाग्राकृतिर्दण्डो हस्तमात्रप्रमाणतः ।
अङ्गुष्ठाग्रबिलं निम्नं कार्यं तस्य च पुष्करम् ॥
सर्वत्राङ्गुष्ठमानेनोत्तानवृत्तपुष्करम् ।
शान्तिवृक्षमयी कार्या दर्वीयं निम्नपुष्करा ॥

अन्यैरप्युक्तम् । Gu$_2$ 29v

स्रुवलक्षणिका दर्वी विशेषस्तत्र कथ्यते । Ku 28v,
ज्येष्ठाङ्गुष्ठसमो दण्डः पुष्करं हस्ततालुना ॥ Gu$_1$ 31r
अङ्गुष्ठपर्वमानेन सर्वत्र वर्तुलाकृति ।
प्रमाणमाहुतेर्ज्ञेयं तद्वद्वै स्रुवपुष्करम् ॥

गोपथब्राह्मणे ।

गोपुच्छाग्राकृतिर्दण्डो हस्तमात्रप्रमाणतः । Ni 26r
अर्धाङ्गुष्ठप्रमाणेन निम्नं शिरसि खानयेदिति ॥

तथा च विधिशौचे ।

---

16–17 AVPariś 27.2.4 गोपुच्छाग्राकृतिर्दण्डो मण्डलाग्रं शिरो विदुः । अङ्गुष्ठाग्रप्रमाणेन निम्नं शिरसि खानयेत् ॥

---

1 °लिते स्व°] NiGu$_1$Gu$_2$, °लितस्व° Ku
2 गन्धपुष्पैः] Gu$_1$, पुष्पैः Ni, गन्धपुष्पै KuGu$_2$
4 स्रुवस्ताम्रमयः] corr., श्रुवस्ताम्रमयः NiKu, श्रुवस्ताम्रमयं Gu$_1$, श्रुवस्ताम्रमय Gu$_2$
5 °प्रमाणश्च] NiKuGu$_2$, °प्रमाणैश्च Gu$_1$
5 वृत्तो द्व्य°] em., वृत्तोऽर्द्ध° Ni, वृत्तोर्द्ध° Ku, वृत्तोऽद्व° Gu$_1$, वृताद्धा° Gu$_2$
8 °मानेनोत्तान°] em., °मानेनौत्तान° NiKuGu$_1$Gu$_2$
9 शान्तिवृक्षमयी] NiGu$_2$, शान्तवृक्षमयी Ku, शान्तिवृक्षमया Gu$_1$
11 °स्तत्र] NiKuGu$_2$, °तस्त्र Gu$_1$
13 °कृति] corr., °कृतिः NiKuGu$_1$Gu$_2$
18 तथा च विधिशौचे ।] After this attribution, Gu$_2$ repeats the verse कुशाग्रद्वयसंयुक्तं °°° कृतमिति found with the same attribution on p. 87

> दाहदोषनिवृत्त्यर्थः स्रुव औदुम्बरः स्मृत इति ।

औदुम्बरस्ताम्ब्र इत्यर्थः ।

> अनुक्तेऽपि हि संस्कारे स्रुववत्संस्कृता भवेत् ।
> आपन्नत्वात्स्रुवस्थाने दर्वी मण्यादिकर्मसु ॥

अथ स्रुवग्रहणलक्षणं । गोपथे ।

> हीयते यजमानो वै स्रुवस्य मूलदर्शनात् ।
> पुत्रैरिष्टफलैः पूर्तैः श्रुतिरेषा पुरातनी ॥
> Gu$_2$ 30r तस्मात्संगोपयेन्मूलं होमकाले स्रुवस्य च ।
> नात्युच्छ्रितं नातिनीचं धारयेत्सुसमं दृढम् ॥

इति वचनाद्विष्णोर्हस्तोऽसीत्येवमादिना शर्मणा दैव्येनेत्येवमन्तेन मन्त्रेण कनीनिकां वर्जयन्नितराङ्गुलिभिर्मूलमदर्शयन् यथोक्तलक्षणं ताम्ब्रं खादिरं वा स्रुवमप्रमत्तो दृढतरं गृह्णीयात् ।

---

10 विष्णोर्हस्तोऽसि ◦◦◦ शर्मणा दैव्येन This is the second mantra of KauśS 3.9 in altered and expanded form. The *sakalapāṭha* is given in PVSP, p. 90 (corrected): विष्णोर्हस्तोऽसि दक्षिणः पूष्णा दत्तो बृहस्पतेः । तं त्वाहं स्रुवमाददे भूतानां हव्यवाहने ॥ भूतये पुष्टये सहस्रपोषाय मह्यमपरिमितपोषाय । मह्यं भूत्यै मह्यं पुष्ट्यै मह्यं ह्रियै मह्यं श्रियै मह्यं यशसे मह्यमायुषे मह्यं बलाय मह्यमन्नाय मह्यमन्नाद्याय मह्यं सहस्रपोषाय मह्यमपरिमितपोषाय ॥ अयं स्रुवोऽभिजिगर्ति होमान् शताक्षरछन्दसा जागतेन । सर्वा यज्ञस्य समनक्तु विष्ठा बार्हस्पत्येन शर्मणा दैव्येन ॥

---

1 ◦दोषनिवृत्त्यर्थः] corr., ◦दोषनिवृत्यर्थः Ni, ◦दोषनिवृर्त्त्यर्थः Ku, ◦दोषेनिवृत्यर्थः Gu$_1$, ◦दोसनिवृत्यर्थः Gu$_2$
1 स्रुव औदुम्बरः] corr., श्रुव औदुम्बरः NiKuGu$_1$, श्रुवमौदुम्बरः Gu$_2$
1 स्मृत] NiGu$_1$Gu$_2$, श्रुति Ku
2 ◦स्ताम्ब्र इत्यर्थः] NiKu, ◦स्ताम्र इत्यर्थः Gu$_1$, ◦स्ताम्ब्रमित्यर्थः Gu$_2$,
3 स्रुववत्सं◦] corr., श्रुववत्स◦ Ni, श्रुवत्सं◦ KuGu$_1$, श्रुववत्सं◦ Gu$_2$
3 ◦स्कृता] em., ◦स्कृतो NiKuGu$_1$Gu$_2$
4 आपन्नत्वात्स्रुवस्थाने दर्वी] em., आपन्नत्वा●वस्थानं दर्वी Ni, आपन्नत्वाच्छ्रुवस्थानदर्वी Ku, अपन्नत्वात्श्रुवस्थानं दर्वी Gu$_1$Gu$_2$
5 ◦ग्रहण◦] NiKuGu$_2$, ◦ग्रहीण◦ Gu$_1$
6 ◦मानो] NiGu$_1$, ◦माने Ku, ◦मानौ Gu$_2$
7 पुत्रै◦] NiKuGu$_2$, पुतै◦ Gu$_1$
7 पूर्तैः] NiKuGu$_1$, पुर्ण्णे Gu$_2$
7 श्रुतिरेषा] NiGu$_1$Gu$_2$, श्रुवरेषा Ku
8 ◦गोपयेन्मूलं] NiKuGu$_1$, ◦गोपयेमूलं Gu$_2$
9 नात्युच्छ्रितं] NiGu$_1$Gu$_2$, नात्युच्छ्रिष्टं Ku
10 दैव्येनेत्येवमन्तेन] Gu$_2^{ac}$, दैव्येनेत्येव NiKuGu$_2^{pc}$, दैव्येनेत्यव Gu$_1$
10 कनीनिकां] NiKuGu$_1$, कननीकां तर्जनीं चग Gu$_2$
11 वर्जयन्नितरा◦] NiKuGu$_2$, तर्जन्वीतरा◦ Gu$_1$
11 ◦र्मूलमदर्शयन्] NiGu$_2$, ◦र्मूलदर्शयन् Ku, ◦र्मूलमर्दशयन् Gu$_1$
11 यथोक्त◦] NiKuGu$_1$, यथो◦ Gu$_2$
11 ◦लक्षणं] em., ◦लक्षणां NiKuGu$_1$Gu$_2$
11 ताम्ब्रं खा◦] NiKuGu$_2$, ताम्ब्रखा◦ Gu$_1$
11 ◦मत्तो] NiKuGu$_1$, ◦मन्तो Gu$_2$

ततः कर्ता निष्टप्तं रक्ष इति चतसृभिः कल्पजाभिः प्रत्यृचं परिवृत्य परिवृत्य पृष्ठपार्श्वद्वयोदरेषु अग्नौ स्रुवं प्रताप्य । Ku 29r

ततो हावकः स्रुवस्य मूलमध्याग्रेषु क्रमाद् ब्रह्माविष्णुशिवान् चिन्तयित्वा अग्नेर्वायव्यकोणे प्रस्तरस्येशानभागे वालुकापुञ्जोपरिस्थापिताज्यस्थालीं तदुपरि उत्तराग्रं पवि- Gu₁ 31v त्रं स्थापयित्वा । ॐ भूः शं भूत्या इत्यादि चतुर्भिरवसानैः प्रत्यवसानं स्रुवेण संस्कृतं घृतं गृहीत्वाज्यस्थाल्यां पवित्रोपरि निवर्जयेत् । चतुर्गृहीतमभिधीयते । तथा च विधिशौचे ।

चतुर्गृहीत आज्यार्थं सर्वो न शक्यते यतः ।
निवर्तयितुमित्यर्थाद्यावदर्थः प्रकल्पयेत् ॥
पवित्रस्योपरिष्टाच्च गृह्णीयात्संस्कृतं घृतम् । Ni 26v
चतुर्गृहीतमध्ये तु तेन होमं समाचरेदिति ॥

एतावदाज्येन सर्वस्य होमस्य निवर्तयितुमशक्यत्वात् सपवित्रघृतपात्रोपरि स्रुवे संस्कृत- Gu₂ 30v हविःशेषं द्रव्योपकल्पक आददान आज्यपात्रं पूरयेत् । एवं संस्कृताज्यपरिसमाप्तेरन्याज्य-

---

1 निष्टप्तं रक्षः This is the first mantra of KauśS 3.9 in expanded form. The *sakalapāṭha* is given in PVSP, p. 90 (corrected): निष्टप्तं रक्षो निष्टप्तारातिः निष्टप्तः सोऽस्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥ १ ॥ प्रत्युष्टं रक्षो प्रत्युष्टारातिः प्रत्युष्टः सोऽस्तु ◦◦◦ द्विष्मः ॥ २ ॥ निर्दग्धं रक्षो निर्दग्धारातिः निर्दग्धः सोऽस्तु ◦◦◦ द्विष्मः ॥ ३ ॥ अपहतो रक्षो अपहतारातिः अपहतः सोऽस्तु ◦◦◦ द्विष्मः ॥ ४ ॥ 5 ॐ भूः शं भूत्यै KauśS 3.10

---

1 परिवृत्य परिवृत्य] $NiGu_1$, परिवृत्य $KuGu_2$
3 क्रमाद् ब्रह्माविष्णुशिवान्] $NiGu_1$, क्रमाद् ब्रह्माविष्णुमहेश्वरान् Ku, द् ब्रह्माविष्णुशिवान् $Gu_2$
4 उत्तराग्रं] $NiGu_1Gu_2$, स्थापिता उत्तराग्रं Ku
5 स्थापयित्वा] $NiKuGu_2$, कृत्वा $Gu_1$
5 भूत्या इत्यादि] $Gu_1$, भूता इत्यादि Ni, भूत्यादि $KuGu_2$
5 चतुर्भिरवसानैः] $NiKuGu_1$, चतुर्भि मन्त्रैरवशानैः $Gu_2$
5 प्रत्यवसानं] $NiGu_1Gu_2$, प्रत्यृचं वसानं Ku
5 स्रुवेण संस्कृतं] $Gu_1$, स्कृतं NiKu, श्रुवेण सस्कृतं $Gu_2$
6 गृहीत्वाज्यस्थाल्यां] $KuGu_2$, हीत्वाज्यस्थाल्यं Ni, गृहीत्वाज्यस्थाल्यं $Gu_1$
6 तथा च] $KuGu_1Gu_2$, यथा Ni
7 चतुर्गृहीत आ◦] NiKu, चतुर्गृही आ◦ $Gu_1$, चतुर्गृहीतमा◦ $Gu_2$
7 यतः ।] $KuGu_2$, यत्रः । Ni, om. $Gu_1$
8 निवर्तयितुमित्यर्थाद्यावदर्थः] Ni, निर्वर्त्तयितुमित्यर्थाद्दृयावदर्थः Ku, त्तर्जनीवर्त्तयितमत्यर्थाद्यावदर्थः $Gu_1$, निवर्त्तयितुमत्यर्थात् यावदर्थं $Gu_2$
9 ◦च्च गृह्णीयात्सं◦] Ku, ◦च्चतुर्गृह्णीयात्सं◦ Ni, ◦च गृह्णीयात्सं◦ $Gu_1$, ◦च गृह्णियात्स◦ $Gu_2$
10 समाचरेदिति] $Gu_1$, समाचरेत् इति Ni, समाचरेत इति Ku, समाचरेत् $Gu_2$
11 एतावदाज्येन] $KuGu_1Gu_2$, एवतावदाज्येन Ni
11 होमस्य] $NiGu_1Gu_2$, होमेन Ku
11 सपवित्र◦] $NiGu_1$, सर्वत्र Ku, सपवित्रं $Gu_2$
11 ◦पात्रोपरि] $NiKuGu_1$, ◦पात्रेपरि $Gu_2$
11 स्रुवे संस्कृत◦] corr., श्रुवे संस्कृत◦ $NiKuGu_2$, श्रुवसंस्कृत◦ $Gu_1$
12 द्रव्योप◦] $NiKuGu_1$, द्रव्येप◦ $Gu_2$
12 आददान आज्यपात्रं] Ni, आददावाज्यपात्रीं Ku, आददाज्यपात्रं $Gu_1$, आदवान आजपात्रं $Gu_2$

संयोगे पूर्वसंस्कारेऽपि संस्कारः स्यात् । यथा प्रथमगर्भसंस्कृतनारीद्वितीयादिगर्भसंस्कारापत्तिः । ततो होता पर्युक्षणपात्रजलेन तदाज्यं पर्युक्ष्य संस्पृशेत् । अन्यथा हुतं दत्तं निर्ऋतेर्भागधेयं स्यात् । विधिशौचवचनात्सर्वेषु हवनद्रव्येषु एवं पर्युक्षणस्पर्शने कर्तव्ये इति
Ku 29v जानीयात् । अस्मिन्नवसरे महाव्याहृतिसावित्रीशान्तिब्रह्मजज्ञानैराज्यं जुहुयादित्येके ।

गोपथब्राह्मणे ।

अधुन्वन्वापि जुहुयात्स्रुवेणास्फुटिताहुतीः ।
धुन्वन् हिनस्ति पुत्रांश्च राक्षसा स्फुटिताहुतिः ॥
Gu$_1$ 32r नान्यत्किंचिदभिध्यायेदुद्धृत्यापतिताहुतिम् ।
तद्दैवतमभिध्यायेदाहुतिर्यस्य दीयते ॥
स्रुवे पूर्णे जपेन्मन्त्रमुत्तानं शान्तिके करम् ।

---

2–3 अन्यथा हुतं दत्तं निर्ऋतेर्भागधेयं स्यात् । Cf. p. 63.
4 महाव्याहृतिसावित्रीशान्तिब्रह्मजज्ञानैः Cf. p. 63.
6–7 AVPariś 27.1.4 अधुन्वंश्चैव जुहुयात्स्रुवेणास्फुटिताहुतिम् । धुन्वन् हि हन्ति पुत्रान् तु राक्षसा स्फुटिताहुतिः ॥
8–9 AVPariś 27.1.5 नान्यत्किंचिदभिध्यायेदुद्धृत्यान्यत आहुतिम् । तद्दैवतमभिध्यायेदाहुतिर्यस्य हूयते ॥
91.10–92.1 AVPariś 27.2.1 स्रुवे पूर्णे जपेन्मन्त्रमुत्तानं शान्तिके करम् । शान्तिके पौष्टिके चैव वर्जयेत्तु कनीनिकाम् ॥

---

1 पूर्वसंस्कारेऽपि संस्कारः] NiKuGu$_1$, पूर्वसंस्कारः Gu$_2$
1 यथा] NiKuGu$_2$, om. Gu$_1$
1 प्रथमगर्भसंस्कृत॰] Gu$_1$, प्रथमगर्भसंस्कृता॰ NiGu$_2$, प्रथगर्भसंस्कृता॰ Ku
1–2 ॰द्वितीयादिगर्भसंस्कारापत्तिः] em., ॰द्वितीयादिगर्भवत्संस्कारापत्ते Ni, ॰द्वितीयगर्भवत्संस्कारपत्तेः Ku, ॰द्वितीयगर्भवत्संस्कारापत्तेः Gu$_1$, ॰द्वितीयादिगर्भवत्संस्कापते Gu$_2$
2 पर्युक्ष्य] KuGu$_1$Gu$_2$, पर्युक्ष{णं} Ni
2 संस्पृशेत्] NiKuGu$_1$, स्पाशेत् Gu$_2$
2 ॰हुतं दत्तं] NiKuGu$_2$, ॰दत्तं हुतं Gu$_1$
3 एवं] NiGu$_1$Gu$_2$, तद्वत् Ku
3 ॰स्पर्शने] NiKuGu$_2$, ॰सर्शने Gu$_1$
3 कर्तव्ये] NiKuGu$_1$, कर्त्तव्य Gu$_2$
3 इति] NiKuGu$_2$, om. Gu$_1$
4 अस्मिन्नवसरे] NiKuGu$_1$, अस्मिन् वसरे Gu$_2$
6 अधुन्वन्वापि] em., धुन्वन्वापि NiKu, धुन्वन्यापि Gu$_1$, आधुन्वनापि Gu$_2$
6 ॰त्स्रुवेण स्फुटिताहुतीः] em., ॰च्छ्रुवेणोस्फुटिताहुतिः Ni, ॰च्छ्रुवेणोस्फटिताहुतिः Ku, ॰च्छ्रुवेणोस्फुटिताहुतिहुहुतिः Gu$_1$, ॰च्चृवेणास्फुटीताहुति Gu$_2$
7–8 धुन्वन् ॰॰॰ स्फुटिताहुतिः ॥] This hemistich is omitted in Gu$_2$
7 धुन्वन्] NiKu, धन्वन् Gu$_1$, lac. Gu$_2$
7 हिनस्ति] NiKu, दितिस्त्रि Gu$_1$, lac. Gu$_2$
7 राक्षसा] Ku, राक्षसां NiGu$_1$, lac. Gu$_2$
8 ॰ध्यायेदुद्धृत्यापतिताहुतिम्] em., ॰ध्याये जुहुदापतताहुतिः NiGu$_1$, ॰ध्याये जुहुयात्पत्रताहुतिं Ku, ॰ध्यायेदुद्धृतापच्चदाहुति Gu$_2$
9 ॰ध्यायेदा॰] Gu$_2$, ॰ध्याये आ॰ NiKuGu$_1$
10 ॰मुत्तानं] em., ॰मुत्तानः NiKuGu$_1$Gu$_2$

शान्तिके पौष्टिके चैव वर्जयेत्तु कनीनिकामिति ॥

अथाग्नेः कर्णादावाहुतिदाने दोषमाहागमशास्त्रे ।

आस्यान्तर्जुहुयादग्नेर्विपश्चित्सर्वकर्मसु ।
कर्णहोमे भवेद्व्याधिर्नेत्रे त्वन्ध उदीरितः ।
नासिकायामात्मपीडा मस्तके धनसंक्षयः ॥

इति वचनात्सर्वदैवास्ये होमं कुर्यात् । चाक्षुषादौ होमेन दोष इति विशेषवचनात् । Ni 27r

ॐ स्वयंभूर्ब्रह्मा ऋषिर्देवी गायत्री छन्दोऽग्निर्देवता दिव्यपुरस्ताद्धोमे विनियोग इति चिन्तितवान् । हृदा पूतमग्नावग्निर्युनज्मि त्वा युक्तो वह इति चतसृभिर्ऋग्भिर्दिव्यपुरस्ताद्धोमिकगणाभिधानाग्नेर्दक्षिणार्धे चतुरो दिव्यपुरस्ताद्धोमान् जुहुयात् । इमाश्चत्वार आज्याहुतयोऽग्नये इति त्यागः कार्यः । दक्षिणार्ध इति उत्तरभागे जुहुयादिति परिभाषायाम् ।

प्राक्शिरा यज्ञ उत्तानः स्थितो यस्मात्सनातनः । Ku 30r
तस्मादस्योत्तरं चाङ्गं याम्ये याम्यं तथोत्तरमिति ॥

---

8 हृदा पूतम् PS 20.45.8  8 अग्नावग्निः PS 12.18.1 = 15.23.3 = 20.45.9  8 युनज्मि त्वा PS 20.32.8  8 युक्तो वह PS 12.18.2

---

3–5 Śāradātilakatantra 5.154–156, p. 353: आस्यान्तर्जुहुयादग्नेर्विपश्चित्सर्वकर्म्मसु । सधूमोऽग्निः शिरो ज्ञेयं निर्धूमश्चक्षुरेव हि ॥ ज्वलत्कृष्णो भवेत्कर्णः काष्ठमग्नेर्नसस्तथा । प्रज्वलोऽग्निस्तथा जिह्वा एतदेवाऽग्निलक्षणम् ॥ कर्णहोमे भवेद् व्याधिर्नेत्रेऽन्धत्वमुदीरितम् । नासिकायां मनःपीडा मस्तके धनसंक्षयः ॥; Prapañcasārasaṁgraha, part I, Paṭala 7, p. 66: आस्यान्तर्जुहुयाद्वन्हेः (sic) विपश्चित्सर्वकर्मसु । कर्णहोमे भवेद्व्याधिः नेत्रेऽन्धत्वमुदीरितम् ॥ नासिकायां मनःपीडा मस्तके धनसंक्षयः । काष्ठानि कर्णं धूमस्तु नासिकाऽङ्गारका दृशः ॥ भस्म मूर्धा मुखं ज्वाला विज्ञेया यत्र यत्र च ।

---

1 चैव वर्जयेत्तु] Ku, चैवर्जयेत्तु Ni, वर्जयेतु $Gu_1$, चैव वर्ययेतु $Gu_2$
र्चा स्विष्टकृतमग्निं ध्यायन् स्विष्टकृताहुतिमपराजिते भागेऽग्नौ जुहुयात् । अग्नये स्विष्टकृते इदं न ममेति ब्रवीति । स्रुवे घृतं दत्त्वा हविष उत्तरार्धादङ्गुष्ठपर्वपरिमितं हविः सकृद्गृही- [$Gu_2$ 39v] त्वा तत्र द्विर्घृतं दत्त्वाप्यायनमकृत्वाग्नेरीशानभागेऽग्निं स्विष्टकृतमित्यृचा जुहुयादितीतरे प्राहुः ।

तथा च परिभाषायाम् । [Ni 34r]

> स्रुवे घृतमुपस्तीर्य गृह्णीयाद्धविषः सकृत् । [$Gu_1$ 39r]
> अभिघारद्वयं पश्चाद्द्यात्स्विष्टकृताहुतौ ॥

तथा च पैठीनसिः ।

> पञ्चोन्नीतिनो भृगवश्चतुरुन्नीतिरङ्गिराः ।
> एतामङ्गिरसो वृत्तिं भृगवोऽप्यनुमन्यते ।
> सैषा भृग्वङ्गिरोवृत्तिः सर्वयज्ञेषु वर्तत इति ॥

ततः कर्ता सदस्यान् दीर्घमायुरस्त्वित्यादि उच्चैर्वाचयेत् । एतच्च शान्तिवाचनं स्वस्तिवाचनमृद्धिवाचनं पुण्याहवाचनमिति चोच्यते । अथ होता दीर्घमायुरस्त्वित्यु- [Ku 38v] च्चार्य दक्षिणहस्तेनान्तरोदपात्राज्जलधारामुत्तरे क्षिप्त्वा । अस्त्विति सदस्याः सावधानाः

---

3 अग्निं स्विष्टकृतम् Unidentified. For the *sakalapāṭha*, see the preceding page.

---

1 भागेऽग्नौ जुहुयात् ] $NiGu_1Gu_2$, भागे हुत्वा Ku
1 अग्नये ] $NiGu_1Gu_2$, अग्ने Ku
2 ममेति ] $NiGu_1$, मेति $KuGu_2$
2 ब्रवीति ] $KuGu_2$, ब्रुवीति Ni, ब्रुवीत $Gu_1$
2 उत्तरार्धादङ्गुष्ठ° ] $NiGu_1$, उत्तरार्धान्यङ्गुष्ठ° Ku, ऋत्तरार्द्धादङ्गुष्ट° $Gu_2$
2 °परिमितं ] $NiKuGu_1$, °मात्रापरिमितं $Gu_2$
2 हविः ] $NiKuGu_1$, हविषः $Gu_2$
3 तत्र ] $KuGu_1Gu_2$, यत्र Ni
3 द्विर्घृतं ] Ni, द्विघृतं Ku, रघृतं $Gu_1$, दि{घृ}घृतं $Gu_2$
3 °यनमकृत्वागग्नेरीशानभागे ] $NiKuGu_1$, °यनमस्कृत्वा ईशानभागे $Gu_2$
3 जुहुयादितीतरे ] $NiGu_1$, जुहुयाद्वीतरे Ku, जुहुयादिततरे $Gu_2$
5 तथा च ] $NiKuGu_2$, om. $Gu_1$
6 सकृत् ] $NiKuGu_1$, सकृतः $Gu_2$
9 पञ्चोन्नीतिनो ] $NiGu_1$, पञ्चोन्नीतिको Ku, पञ्चोन्नितिर्नो $Gu_2$
9 भृगवश्चतुरुन्नीति° ] em., भृगवश्चतुरन्नीति° $NiGu_1$, भृगवश्चतुरनीति° Ku, भृगवश्चतुरनिति° $Gu_2$
10 एतामङ्गि° ] $NiGu_1Gu_2$, एतावङ्गि° Ku
10 वृत्तिं भृगवो ] em., वृत्तिर्भृगवो $NiKuGu_1$, वृतिभृगवो $Gu_2$
10 ऽप्यनुमन्यते ] $NiGu_1Gu_2^{pc}$, ऽप्यानुमन्यत Ku, प्यनुमन्यन्ते $Gu_2^{ac}$
11 भृग्वङ्गिरो° ] $NiKuGu_1$, भृगवङ्गिरो° $Gu_2$
11 सर्वयज्ञेषु वर्तत ] $NiGu_2$, स{र्शे}रवयज्ञेशु वर्त्तुत Ku, सर्वयज्ञेषूर्त्त $Gu_1$
13 °मृद्धिवाचनं ] $Gu_1Gu_2$, om. NiKu
13 चोच्यते ] $NiGu_1$, चोच्यन्ते $KuGu_2$
13–14 °त्युच्चार्य ] corr., °त्यृचार्य Ni, °त्यृच्चार्य Ku, °ति उच्चार्य्यं $Gu_1$, °त्यंचार्य $Gu_2$
14 °पात्राज्जल° ] $NiKuGu_1$, °पात्रजले $Gu_2$
14 क्षिप्त्वा । अस्त्विति ] $NiKuGu_1$, क्षिप्त्याय्वस्त्विति $Gu_2$

प्रतिवदेयुः । ॐ शिवा आपः सन्त्विति वेदेर्वायव्यकोणे प्रागास्यमुपविष्टानां सदस्यानां
$Gu_2$ 40r दक्षिणहस्तेषूदपात्रोदकं निक्षिपेत् । ते सन्त्विति प्रतिवदेयुः । तथा ॐ सौमनस्यमस्त्विति
पुष्पाणि । ते अस्त्वित्याहुः । ॐ अक्षतं चारिष्टं चास्त्विति यवान् धान्यानि वा । अक्षत-
तण्डुलान्वा । अस्त्विति ते । यदुद्दिष्टदक्षिणाः पान्त्विति फलानि । पान्त्विति ते ।
एवं ॐ शान्तिरस्तु । ॐ पुष्टिरस्तु । ॐ वृद्धिरस्तु । ॐ यच्छ्रेयं तदस्तु । ॐ आरो-
ग्यमस्तु । ॐ आयुष्यमस्तु । ॐ तिथिकरणमुहूर्तनक्षत्रलग्नसम्पदस्तु । ॐ तिथिकरण-
मुहूर्तनक्षत्रलग्नदिग्देवताः प्रीयन्ताम् । ॐ आदित्यादयो ग्रहाः प्रीयन्ताम् । ॐ ऋष-
$Gu_1$ 39v यश्छन्दांस्याचार्याश्च प्रीयन्ताम् । ॐ अङ्गिरसश्चाङ्गिरसाश्च प्रीयन्ताम् । ॐ अथर्वाण-
श्चाथर्वणाश्च प्रीयन्ताम् । ॐ स्विष्टं सुहुतमस्तु । ॐ मन्त्राणां साफल्यमस्तु । ॐ उत्तरे
Ni 34v कर्मण्यविघ्नमस्तु । ॐ बहुधेयं चास्तु । ॐ यजमानस्याभिलषितहोमकर्म सुहुतमस्त्वि-
$Gu_2$ 40v ति । एवमृत्विजोक्ताः सप्तदशाशंसाः सदस्याः प्रतिवदेयुः । ततो होता ॐ स्वस्तिं भवन्तो
ब्रुवन्त्विति वदेत् । ते ॐ स्वस्तीति त्रिर्वदन्ति । एवम् ॐ ऋद्धिं भवन्तो ब्रुवन्त्विति

---

1 प्रतिवदेयुः] $NiKuGu_2$, प्रतिपदेइत्युः $Gu_1$
1 शिवा आपः] $NiGu_1Gu_2$, शिवापः Ku
1 °कोणे] $KuGu_1$, °कोणो Ni, °केणे $Gu_2$
1 °मुपविष्टानां] $Gu_1Gu_2$, °मुपतिष्टानां Ni, °सुतिष्ठानां Ku
1 सदस्यानां] $NiGu_1Gu_2$, om. Ku
2 ते] $KuGu_1Gu_2$, तत्र Ni
2 °वदेयुः] $NiKuGu_2$, °वदेइत्युः $Gu_1$
2 तथा] $NiGu_1Gu_2$, तथा च Ku
2 सौमनस्यमस्त्विति] $NiGu_1$, सौमनस्यस्त्विति Ku, सौमनस्यमस्तु इति $Gu_2$
3 अस्त्वित्याहुः] Ni, चास्त्वीत्याहुः Ku, अस्त्वात्याहु $Gu_1$, +चा+स्त्वित्याहु $Gu_2$
3 अक्षतं] $NiKuGu_2$, अयतं $Gu_1$
3 धान्यानि] $Gu_1$, धान्यांनि Ni, धान्यं $KuGu_2$
3–4 अक्षत°] em., अक्षते $NiGu_1$, अक्षतं Ku, अयते $Gu_2$
4 अस्त्विति] $NiGu_1Gu_2$, अक्षतं Ku
4 यदुद्दिष्टदक्षिणाः] $NiKuGu_1$, यदुद्दिष्ट $Gu_2$
4 पान्त्विति ते] $NiGu_1$, पान्त्विते $KuGu_2$
5–6 एवं ॐ ◦◦◦ सम्पदस्तु] Ku presents this passage in abbreviated form: एवं शान्तिरस्तु ॥ इत्यादि वदेत् ॥
5 पुष्टिरस्तु] $NiKuGu_1$, पुष्टरस्तु $Gu_2$
5 यच्छ्रेयं] corr., यच्छ्रेय $NiGu_1$, alt. Ku, यच्छ्रे $Gu_2$
6 ॐ तिथिकरणमुहूर्तनक्षत्रलग्नसम्पदस्तु ।] $Gu_1$ repeats all but ॐ
6 °लग्न°] $NiGu_1$, alt. Ku, om. $Gu_2$
6 ॐ] $NiKuGu_2$, om. $Gu_1$
7 ॐ] $NiGu_1Gu_2$, om. Ku
8 अङ्गिरसश्चाङ्गिरसाश्च] Ni, अङ्गिरसाश्चाङ्गिरसाश्च Ku, अग्निरसश्चाङ्गिरसाश्च $Gu_1$, अङ्गिरसाश्चाङ्गिरसा $Gu_2$
8–9 अथर्वाणश्चा°] $Gu_1$, अथर्वणाश्चा° $NiGu_2$, अथर्वणश्चा° Ku
9 स्विष्टं] $Gu_1Gu_2$, स्विष्ट Ni, स्वष्टिं Ku
9–10 ॐ मन्त्राणां ◦◦◦ चास्तु ।] Ku every time omits ॐ here
10 °विघ्नमस्तु] $NiKuGu_1$, °विघ्नदस्तु $Gu_2$
10–11 °सुहुतमस्त्विति] $NiKuGu_1$, °सुहुर्त्तमस्तु $Gu_2$
11 सप्तदशाशंसाः] $NiGu_1Gu_2$, सप्तदशासिंशाः Ku
12 वदेत्] Ni, प्रतिवदेत् $KuGu_2$, प्रतिवदे{युः ॥}त् $Gu_1$
115.12–116.4 ते ॐ ◦◦◦ दक्षिणां दद्यात् ।] This passage is omitted in $Gu_2$
12 ते ॐ] Ni, ते $KuGu_1$, lac. $Gu_2$
12 स्वस्तीति] $NiGu_1$, स्वस्ति Ku, lac. $Gu_2$
12 ब्रुवन्त्विति] $NiGu_1$, बृन्त्विति Ku, lac. $Gu_2$

ब्रवीति । सदस्या ॐ ऋध्यतामिति त्रिर्वदन्ति । तथा ॐ पुण्याहं भवन्तो ब्रुवन्त्विति Ku 39r
प्रतिपादयेत् । ते चोँ पुण्याहमिति त्रिर्वदन्ति । ततो यजमानस्याभिलषितहोमकर्म सुहुतमस्तु । एतच्छान्तिवाचनं सर्वकर्मेषु भवति ।

ततो यजमानो होतादिभ्यो यथाशक्तिसाहणं दक्षिणां दद्यात् । तथा च पैठीनसिः ।

ऋत्विक्तुष्टिकरीं सम्यग्दक्षिणां प्रतिपादयेत् ।
यथोक्तं च सदस्येभ्यः कृते वै स्वस्तिवाचन इति ॥

अथ दक्षिणावाक्यम् । ॐ अद्यामुकसगोत्रायाथर्ववेदपिप्पलादशाखाध्यायिने अमुकदेवशर्मणे तुभ्यं अमुकसगोत्रः श्रीमान् अमुकदेवशर्माहं मम अमुककर्मणि कृत एतद्धोतृकर्मप्रतिष्ठार्थं एतत्काञ्चनं दक्षिणां ददानि । ततोऽर्चितं प्रतिगृह्य । स्वस्तीति त्रिरुक्तम् । सावित्रीं पठित्वा । क इदं कस्मा इत्यृचा धारयन् । एवं ब्रह्मादिभ्योऽपि दक्षिणां वितरेत् ।

दक्षिणाप्रमाणमाह । पैठीनसिः ।

प्रमाणं दक्षिणायास्तु द्रव्यं वा यत्र कथ्यते । Gu$_1$ 40r
तत्तथैव प्रदातव्यं अनादेशे तु गौः स्मृता ॥

---

10 क इदं कस्मै PS 1.30.6

---

2 °पादयेत्] NiGu$_1$, °पादये Ku, lac. Gu$_2$
2 ते चोँ] Ni, ततः ॐ Ku, ते चँ Gu$_1$, lac. Gu$_2$
3 °कर्मेषु भवति] em., °कर्म्मेषु भवन्ति NiGu$_1$, °क{र्मे}र्मेसु भवतु Ku, lac. Gu$_2$
4 ततो °°° दद्यात् ।] Gu$_1$ places this after the following quote of Paiṭhīnasi
4 होतादिभ्यो] NiKu, होत्रादिभ्योः Gu$_1$, lac. Gu$_2$
4 यथाशक्तिसाहणं] Gu$_1$, यथाशान्तिसाहणं Ni, यथाशक्ति Ku, lac. Gu$_2$
4 तथा च] NiKuGu$_2$, om. Gu$_1$
4 पैठीनसिः] NiKuGu$_1$, पैठी{व}त् Gu$_2$
5 ऋत्विक्तुष्टिकरीं] Ku, ऋत्विक्कुष्टिकरिं Ni, ऋत्विकुष्टिकरीं Gu$_1$, ऋत्विक्तुष्टरीं Gu$_2$
6 कृते] Gu$_1$Gu$_2$, कृतो Ni, कृत Ku
7 अथ दक्षिणावाक्यम्] NiKuGu$_2$, वाक्यं Gu$_1$
7 ॐ] NiKu, om. Gu$_1$Gu$_2$
7 °पिप्पलाद°] NiKuGu$_1$, °पिपलाद° Gu$_2$
8 अमुकदेवशर्माहं] NiGu$_2$, अमुकशर्माहं Ku, मुकदेवशर्माहं Gu$_1$
8–9 कृत एतद्धोतृ°] em., कृतैतत् होतृ° NiKu, कृतैतद्धौतृ° Gu$_1$, कृतैतद्धोतृ° Gu$_2$
9 एतत्काञ्चनं दक्षिणां] corr., एतत्काचनं दक्षिणां Ni, एतत्काञ्चनदक्षिणां KuGu$_2$, एत{त्}त्काञ्चनं Gu$_1$
9 ददानि] NiKuGu$_1$, द{●}दाति Gu$_2$
9 स्वस्तीति] NiKuGu$_1$, स्वस्त्रि Gu$_2$
10 पठित्वा] NiKuGu$_2$, त्रिः पठित्वा Gu$_1$
10 क इदं] NiGu$_1$Gu$_2$, क इदं क इदं Ku
10 कस्मा इत्यृचा धारयन्] em., कस्मादित्यृचाऽधारयन् Ni, कस्मादित्यृचा Ku, कस्मादित्यधीत्यारन् Gu$_1$, कस्मादित्यृचाधीयात् Gu$_2$
10 ब्रह्मादिभ्योऽपि] em., ब्रह्मादयोऽपि NiKuGu$_2$, ब्रह्मादयो Gu$_1$
10 वितरेत्] NiGu$_2$, विचरेत् Ku, वितरे Gu$_1$
11 दक्षिणाप्रमाणमाह ।] NiKu, om. Gu$_1$, दक्षिणां प्रमाणमाह Gu$_2$
12 द्रव्यं] NiKuGu$_1$, हव्यं Gu$_2$
12 वा यत्र] NiKuGu$_1$, वादित्र Gu$_2$
13 तत्तथैव] KuGu$_1$Gu$_2$, एतत्तथैव वा Ni
13 प्रदातव्यं] em., प्रदातव्य NiKu, प्रदातव्या Gu$_1$Gu$_2$
13 स्मृता] corr., स्मृताः NiGu$_1$Gu$_2$, स्मृतः Ku

स्वशक्त्या वा धनं दद्याद्वित्तशाठ्यविवर्जितः ।
Gu$_2$ 41r दत्त्वा प्रसादयेद्विप्रान् वचनैर्नतिपूर्वकैरिति ॥

Ni 35r तथा च विधिशौचे ।

सर्वत्रैवं प्रदद्यात्तु काकणीं दक्षिणाधमाम् ।
Ku 39v भूयो भूयोऽथ वृद्धिः स्याद्यथात्यागस्तथा फलम् ॥
काकणीत्युच्यते गुञ्जा स्वर्णस्य विधिदर्शनात् ।
सर्वकर्मसु तां दद्यादधनो दक्षिणाधमामिति ॥

ऋत्विक् पुनः स्वस्तिं सदस्यान्वाचयेत् । ततस्ते यजमानायाशिषं ददति । कारयिता च तदभिमन्त्रितं दूर्वाक्षतं मस्तकेऽप्रमत्तः करोति । मितादीनग्निं ब्राह्मणांश्च नमस्करोति । ततो होता ॐ प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता कामसूक्तेनाज्यहोमे विनियोग इति स्मृत्वा । कामसूक्तेनाज्यं प्रत्यृचं जुहुयात् । इमाः पञ्चाज्याहुतयः कामाय । क इदं कस्मा इत्यृचा प्रधानहवींषि सम्पातं कृत्वा । यस्मिन् सम्पातो दत्तस्तत्प्राशित्रं भवति । सूर्यस्य त्वेत्यवसानेनावेक्षते । अयुतोऽहमित्यवसानेन गात्राणि मन्त्रोक्तान्यालभते । देवस्य त्वेति

---

11 क इदं कस्मै PS 1.30.6 12–13 सूर्यस्य त्वा PS 20.57.10 13 अयुतोऽहम् PS 20.57.11 117.13–118.1 देवस्य त्वा ◦◦◦ आ रभे PS 20.57.12

---

1 ◦शक्त्या] NiKuGu$_1$, ◦शक्या Gu$_2$
1 ◦द्वित्तशाठ्य◦] NiKu, ◦द्वित्तश्राथ◦ Gu$_1$, ◦वितसठ्य◦ Gu$_2$
3 तथा च] NiKuGu$_2$, om. Gu$_1$
4 काकणीं] Gu$_1$, काकिणीं NiKu, काकण Gu$_2$
5 भूयोऽथ वृद्धिः] Ni, भूयोऽथवृर्द्धि Ku, भूयो अथ वृद्धिः Gu$_1$, भूयोथवुद्धिः Gu$_2$
5 त्यागस्तथा] NiKuGu$_1$, त्यागं तथा Gu$_2$
6 गुञ्जा] NiKuGu$_2$, मुञ्जा Gu$_1$
7 सर्वकर्मसु] NiGu$_2$, सर्वर्मसु Ku, सर्वकर्म्मसु Gu$_1$
7 दद्यादधनो] NiKuGu$_1$, दद्यधनोद Gu$_2$
8 ऋत्विक्] KuGu$_1$, ऋत्विजः Ni, ऋत्वित्क Gu$_2$
8 °न्वाचयेत्] NiKuGu$_1$, °न्याचरेत्त Gu$_2$
8 ददति] em., ददाति NiKuGu$_1$Gu$_2$
8–9 कारयिता च तदभिमन्त्रितं] NiGu$_1$Gu$_2$, कारयिताच्च्र्यतवभिमन्त्रितं Ku
9 ऽप्रमत्तः] NiGu$_1$, ऽप्रमत्तं Ku, ऽप्रमत्त Gu$_2$
9 नमस्करोति] NiKuGu$_1$, नमस्कारयति Gu$_2$
10 प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो] corr., प्रजापति ऋषि त्रिष्टुप्छन्द इन्द्रो NiKu, प्रजापति ऋषिः त्रिष्टुप छन्द इन्द्रो Gu$_1$, प्रजापति ऋषिस्त्रिष्टुप छन्दरिन्द्रो Gu$_2$
10 काम◦] NiGu$_1$Gu$_2$, काम्य◦ Ku
11 स्मृत्वा] NiKuGu$_2$, ध्यात्वा Gu$_1$
11 इमाः ◦◦◦ कामाय ।] Gu$_1$ and Gu$_2$ omit this sentence
11 पञ्चाज्याहुतयः] em., पञ्चाज्याहुतयो Ni, पञ्चाज्याहुतयोः Ku, lac. Gu$_1$Gu$_2$
12 इत्यृचा] NiKuGu$_2$, इत्यान्तमर्च्चा Gu$_1$
12 कृत्वा] NiKuGu$_2$, कत्वा Gu$_1$
12 दत्तस्तत्प्राशित्रं] em., दत्तस्तत्प्राशितं NiKuGu$_1$, दंत्तत्प्राशितं Gu$_2$
12–13 सूर्यस्य त्वे◦] NiKu, सूर्य्यस्ये त्वे◦ Gu$_1$, सूर्यस्ये◦ Gu$_2$
13 ◦नावेक्षते] NiGu$_1$Gu$_2$, ◦नावेक्षयेत् Ku
13 ◦मित्यवसानेन] NiGu$_1$, +◦मित्यवसाने+ Ku, ◦मित्यवशानेना Gu$_2$
13 मन्त्रोक्तान्यालभते] Ni, मन्त्रोक्तान्यालभ्यते Ku, मन्त्रोक्तान्वालभेत् Gu$_1$, मन्त्रोक्तान्यालभ्येत् Gu$_2$
117.13–118.1 त्वेति खिलावसानेना रभ] Gu$_1$,

खिलावसानेना रभ इत्यन्तेन प्राशित्रं गृह्णाति । अङ्गुष्ठानामिकाभ्याम् । अग्नेष्ट्वेत्यवसानाभ्यां प्राश्य । दन्तैरसंस्पृश्याद्भिरवगारयेत् । तत आचम्य । शान्त्युदकेन पर्युक्षणपात्रजलेन चात्मानमभ्युक्ष्य । ततो योऽग्निर्नृमणा नामेत्यवसानाभ्यामात्मानमनुमन्त्रयेत् । Gu$_1$ 40v
यत्र चरुस्तत्रायं समस्तो विधिर्भवति । यज्ञभाण्डानि स्थापयित्वेत्येवमादि योऽग्निर्नृमणा नामेत्यात्मानुमन्त्रणान्तं संपूर्णो विधिः प्रवर्तते ।

तथा च परिभाषायाम् ।

कामसूक्तस्योत्तमया सम्पातो यत्र पातितः । Ni 35v
तत्प्राशित्रं हविर्ज्ञेयमुदकेनावगारयेत् ॥ Ku 40r

पैठीनसिः ।

अनुमध्यमया चाहुरङ्गुष्ठेन च ब्राह्मणाः ।
ब्रह्मातिपातयेद्दन्तान् प्राशित्रस्य यथा विधिः ॥
ब्रह्मन्नप आचम्य तालुनि प्राशित्रमाजहि ।
दन्तांस्ते मा परायासीद्यथा पूर्णं परापतेदिति ॥

---

1–2 अग्नेष्ट्वा PS 20.57.13–14   3 योऽग्निर्नृमणा नाम PS 20.57.15–16

---

4 यज्ञभाण्डानि स्थापयित्वा Cf. p. 103.

---

त्वेति खिलावसानेना वभ Ni, त्वेति +खिलावसानेन ३+ Ku, त्वेत्यखिलावसानेना रभ Gu$_2$
1 प्राशित्रं] em., प्राशितं NiKuGu$_1$, प्रासितं Gu$_2$
1–2 अग्नेष्ट्वेत्यवसानाभ्यां] NiKuGu$_1$, अङ्गुष्ठे इत्यवसानेनाभ्यां Gu$_2$
2 प्राश्य] NiGu$_1$Gu$_2$, प्राश्ना Ku
2 दन्तैरसंस्पृश्याद्भिरवगारयेत्] KuGu$_2$, दन्तैरसंस्पृश्याद्भिवगाहरयेत् Ni, दतैरसंस्पृश्याद्भिरवगारयेत् Gu$_1$
2 आचम्य] NiKuGu$_1$, राचम्य Gu$_2$
2–3 पर्युक्षणपात्रजलेन] KuGu$_1$Gu$_2$, पर्युक्षणपात्रजलजलेन Ni
3 ऽग्निर्नृमणा] NiGu$_1$, अग्नेर्नृमणा Ku, ग्निनुरमणा Gu$_2$
3 नामेत्यवसानाभ्यां आत्मानमनुमन्त्रयेत्] Ni, नामेत्यवसाननाभ्यां आत्मानमनुमन्त्रयेत् Ku, नामेति अवसानाभ्यां मात्मानुमनुमन्त्रयेत् Gu$_1$, नामे इत्यवशानेनाभ्यां आत्मानंमनुमन्त्रयेत् Gu$_2$
4 चरुस्तत्रायं] NiKu, चरु तत्रायं Gu$_1$Gu$_2$
4 ऽग्निर्नृमणा] NiKuGu$_1$, ऽग्निनृर्मणा Gu$_2$
5 °त्मानुमन्त्रणान्तं] Gu$_1$, °त्मानमनुमन्त्रणान्तं NiGu$_2$, °त्मानमनुमन्त्रान्तं Ku
6 तथा च] NiKuGu$_2$, om. Gu$_1$
7 कामसूक्तस्योत्तमया] NiKuGu$_2$, कामसुक्तस्योत्तमायो Gu$_1$
8 तत्प्राशित्रं] em., तत्प्राशितं NiKuGu$_2$, तत्प्राषितं Gu$_1$
8 °नावगार°] NiGu$_1$Gu$_2$, °नावपार° Ku
11 °पातयेद्दन्तान् प्राशित्रस्य] em., °पातयेद्दन्तान् प्राशितस्य NiGu$_2$, °पान्तयेदन्तान् प्राशितस्य Ku, °पातयेदन्तान् प्राशितंस्य Gu$_1$
12 आचम्य] Gu$_1$Gu$_2$, {●}ाचम्य Ni, ताचम्य Ku
12 तालुनि] NiKuGu$_1$, तालुर्मि Gu$_2$
12 प्राशित्रमाजहि] Ni, प्राशितमजहि Ku, प्राशितमाजहि Gu$_1$Gu$_2$
13 °पतेदिति] em., °पतदिति NiKuGu$_1$, परापतदितिः Gu$_2$

अथ चरुहोमादन्यत्राज्यभागान्तं तन्त्रं कृत्वा महेध्मानाधाय प्रधानाहुतिं निर्वाह्य । ये देवा इति तिसृभिराज्यं हुत्वा । अग्निं स्विष्टकृतमित्यृचाज्यं प्रदाय । शान्तिवाचनं कृत्वा । कारयितुर्दक्षिणां प्रतिगृह्य । कामसूक्तेनाज्याहुतिं विधाय ।

अथानन्तरमुत्तराङ्गावसानं कथ्यते । ततः कर्ता संसमिदिति त्यृचेन सूक्तेन प्रत्यृचं समिधोऽभ्यादध्यात् । इमास्तिस्रः समिदाज्याहुतयोऽग्नये । समा चिनुष्वेत्यृचा समित्परिग्रहकुशमुष्टिसहितं प्रस्तरं गृहीत्वा । पृथिव्यामङ्क्ष्वेत्येतावता मन्त्रेण तस्य समित्परिग्रह- [Gu$_2$ 42r] सहितस्य मूलानि स्रुवे दत्त्वा । अन्तरिक्षेऽङ्क्ष्वेत्येतावता मन्त्रेण तस्यैव मध्यानि क्षीरौद- [Gu$_1$ 41r] नादौ समित्सु चादद्यात् । दिव्यङ्क्ष्वेत्येतावता मन्त्रेण तस्यैवाग्राणि आज्यस्थालीस्थिताज्येनाञ्जयेत् । एवं त्रिः प्रयोगो मन्त्रावृत्त्या । तदनु घृतेन भूयो मूलादारभ्याग्रं याव- [Ku 40v] द्बर्हिरञ्जयित्वा सं बर्हिरक्तमित्यृचाग्नौ जुहुयात् । इदमग्नये ।

ततो होता वि मुञ्चामीत्यृक् । इदमग्नये । ये ते शतमिति चतस्रः । इमाश्चतस्र आ-

---

2 ये देवाः PS 10.8.1–3 2 अग्निं स्विष्टकृतम् Unidentified. For the *sakalapāṭha*, see p. 113 4 संसमित् PS 19.7.1–3 5 समा चिनुष्व PS 16.92.6 6 पृथिव्यामङ्क्ष्व ĀpŚS 3.6.2 etc. No Paippalāda mantra collection seems to contain this and the following two mantras, found in PVSP, p. 105 7 अन्तरिक्षेऽङ्क्ष्व ĀpŚS 3.6.2 etc. 8 दिव्यङ्क्ष्व ĀpŚS 3.6.2 etc. 10 सं बर्हिरक्तम् PS 20.35.9 11 वि मुञ्चामि PS 12.19.9 11 ये ते शतम् PS 18.82.7–10

---

1 चरुहोमाद॰] KuGu$_1$, चऋमाद॰ Ni, चऋहो{ता}माद॰ Gu$_2$
1 ॰भागान्तं] NiKuGu$_1$, ॰भान्तं Gu$_2$
1 तन्त्रं] NiGu$_1$Gu$_2$, तत्र Ku
2 देवा] NiKuGu$_2$, द्येवा Gu$_1$
2 तिसृभिराज्यं] Ni, तिसृभिऋग्भिराज्यं Ku, तिसृभि Gu$_1$, तिसृभिराज्य Gu$_2$
2 स्विष्टकृतमित्यृचाज्यं] Ni, स्विष्टकृमित्यृचाज्यं Ku, सिष्टकृतमित्यृज्यं Gu$_1$, स्विष्टकृतं राज्यं Gu$_2$
2 प्रदाय] NiKuGu$_1$, हुत्वा Gu$_2$
3 कारयितुर्दक्षिणां] KuGu$_1$, कारयितु दक्षिणां Ni, कारयितुं दक्षिणा Gu$_2$
3 कामसूक्तेनाज्याहुतिं] NiKuGu$_1$, om. Gu$_2$
4 अथानन्तरमुत्तराङ्गावसानं] KuGu$_2$, अथानन्तरमुत्तराङ्गादिवसानं Ni, अनन्तरं उत्तराङ्गावसानं Gu$_1$
4 त्यृचेन] KuGu$_1$Gu$_2$, त्र्यृचेन Ni
4 प्रत्यृचं] NiKuGu$_2$, प्रतित्यृचं Gu$_1$
5 ॰दध्यात्] NiKu, ॰दद्यात् Gu$_1$Gu$_2$
5 इमा ॰॰॰ ऽग्नये ।] This sentence is omitted in Gu$_1$ and Gu$_2$
5 चिनुष्वेत्यृचा] NiKuGu$_1$, चनिष्वेत्यृचा Gu$_2$
5–6 समित्परिग्रह॰] NiKuGu$_1$, समित्पारिग्रह॰ Gu$_2$
6 प्रस्तरं] Gu$_1$Gu$_2$, सप्रस्तरं NiKu
6 पृथिव्यामङ्क्ष्वे॰] corr., पृथिव्यामंक्ष्वे॰ NiKu, पृथिव्याक्ष्वे॰ Gu$_1$, पृथिव्यामंक्ष्वे इ॰ Gu$_2$
6 मन्त्रेण] NiKuGu$_2$, मन्त्रे Gu$_1$
7 अन्तरिक्षेऽङ्क्ष्वे॰] em., अन्तरिक्ष अंक्ष्वे॰ Ni, अन्तरिक्षं क्ष्वे॰ KuGu$_2$, अन्तरिक्षं अंक्ष्वे॰ Gu$_1$
8 दिव्यङ्क्ष्वेत्येतावता] corr., दिव्यंक्ष्वेतावता Ni, दिव्यंक्ष्वेत्येतावता KuGu$_1$, दिव्यंक्ष्वे इत्येतावता Gu$_2$
9–10 यावद्बर्हि॰] NiKuGu$_2$, यावर्हि॰ Gu$_1$
10 इदमग्नये ।] NiKuGu$_2$, om. Gu$_1$
11 मुञ्चामीत्यृक्] NiGu$_2$, मुञ्चामीत्यृचा Ku, मुञ्चामित्यृक् Gu$_1$
11 इदमग्नये ।] This sentence is omitted in Gu$_1$, while in Gu$_2$ it is misplaced just below, after वरुणाय
119.11–120.1 इमा ॰॰॰ वरुणाय ।] Gu$_1$ omits this sentence. After it, Gu$_2$ inserts: इदमग्नये ॥ which is correctly place, just above, in Ni and Ku
119.11–120.1 इमाश्चतस्र आज्याहुतयो] em.,

ज्याहुतयो वरुणाय । वि ते मुञ्चामीत्येकैकर्चिकी । इदमग्नये । एताः षडृचो विमोचनी- Ni 36r
संज्ञा । एतैर्वरुणपाशविमोचनसाधनत्वादेताभिः । प्रत्यृचमाज्यं जुहुयात् । ऋक्षट्कान्ते सकृदित्यपरे । एतेषु षट्सु मन्त्रेष्वहुतेषु पूर्वविस्मृतं कर्म यदा स्मरेत् तदा यदस्मृतीत्यृचाज्यहोमेन तत्प्रायश्चित्तं कृत्वा विस्मृतं कर्म कुर्यात् । यर्हि हुतेष्वेतेषु मन्त्रेषु विस्मृतं कर्म यदि स्मरेत्तर्हीदं प्रायश्चित्तं त्यक्त्वा समस्तस्य कर्मणः पुनरावृत्तिर्भवति । कृतस्य कर्मणो निष्फलत्वात् । इति विमोचनीसंज्ञायाः फलम् । तथा च पैठीनसिः ।

कुर्याद्वा विस्मृतं कर्म हुत्वा यदस्मृतीत्यृचम् ।
विमुञ्चामीत्येवमादिष्वहुतेषु यदा स्मरेत् ॥
हुतेष्वेतेषु मन्त्रेषु न कुर्यात्कर्म विस्मृतम् । Gu$_2$ 42v
क्रियते पुनरावृत्तिः समस्तस्य च कर्मण इति ॥

ततः कर्ताग्नेरुत्तरार्धे संस्थितहोमान् जुहुयात् । प्र वह देवानित्येका । यदद्य त्वेति

---

1 वि ते मुञ्चामि PS 20.32.9 3–4 यदस्मृति PS 20.8.9 11 प्र वह देवान् This is a variation upon the also unidentified mantra whose *pratīka* figured on p. 95. The *sakalapāṭha* is given in PVSP, p. 106 (corrected): प्र वह देवान् यज्ञबाहो अस्मिन् यज्ञे मा च नोऽवरात्सीः । प्र च वह जातवेदो देवान् सुवहा च वह ॥ 11 यदद्य त्वा PS 20.34.9–10 & 20.35.1

---

इमाश्चतस्राज्याहुतयो NiKu, lac. Gu$_1$, इमाश्चतश्राणि हुतयो Gu$_2$
1 °त्येकैकर्चिकी ] corr., °त्येकैकार्च्चिकी NiKuGu$_2$, °त्येकैकर्च्चिकी Gu$_1$
1 इदमग्नये । ] NiKu, om. Gu$_1$Gu$_2$
2 °विमोचन° ] NiKuGu$_2$, °विमोचनी° Gu$_1$
2 ऋक्षट्कान्ते ] NiGu$_1$Gu$_2$, ऋत्विकषट्कान्ते Ku
3 एतेषु ] NiKuGu$_1$, एते Gu$_2$
3 षट्सु ] NiKuGu$_2$, षट्ठु Gu$_1$
3 मन्त्रेष्वहुतेषु ] em., मन्त्रेषु हुतेषु NiKuGu$_2$, मन्त्रेषु Gu$_1$
3 पूर्वविस्मृतं ] NiKuGu$_2$, विष्मृतं Gu$_1$
3 तदा ] NiGu$_1$Gu$_2$, यदा Ku
4 °यश्चित्तं° ] NiKuGu$_2$, °यश्चिश्चित्तं Gu$_1$
4 यर्हि ] NiGu$_2$, यदा Ku, यह Gu$_1$
5 स्मरेत्तर्हीदं ] NiKu, स्मरेत्तहीदं Gu$_1$, स्मरेत्तर्हितं Gu$_2$
5 त्यक्त्वा ] NiKuGu$_2$, त्येक्त्वा Gu$_1$
5 पुनरावृत्ति° ] NiKuGu$_1$, पुनरावर्त्ति° Gu$_2$
6 °संज्ञायाः ] NiKuGu$_2$, °संज्ञायां Gu$_1$
6 फलम् ] Gu$_1$Gu$_2$, फलः NiKu
6 तथा च ] NiKuGu$_2$, om. Gu$_1$
7 कुर्याद्वा ] NiKuGu$_1$, कृत्वाद्वा Gu$_2$
8 विमुञ्चामीत्येव° ] NiKuGu$_1$, विमुञ्चामिवित्येव° Gu$_2$
9 मन्त्रेषु ] NiKuGu$_2$, मन्त्रे Gu$_1$
10 पुनरावृत्तिः ] NiKuGu$_1$, पुनरावर्त्तिः Gu$_2$
10 च ] KuGu$_1$Gu$_2$, om. Ni
11 ततः °°° जुहुयात् । ] After this sentence the scribe of Gu$_2$ inserts तत दिव्यसाम्पदप्रायश्चित्तियैरेतत्रयें कुर्यादिति प्रत्येकं विशेषवने दृस्यते ॥ due to eye-skip (cf. p. 122), after which he must have realised his error, and returns to the present passage
11 जुहुयात् ] NiKuGu$_2$, जुयात् Gu$_1$
11 वह देवानित्येका ] em., वहं देवानित्येका Ni, वहन्देवानित्येका KuGu$_1$, वहं देवामित्येका Gu$_2$
11 यदद्य ] NiKuGu$_2$, यददे Gu$_1$

तिस्रः । संस्रावभागा इति सप्त । इत्येकादशभिर्ऋग्भिर्दिव्यसंस्थितहोमान् जुहुयात् । उत्त- [Ku 41r] रार्ध इमा एकादशाज्याहुतयोऽग्नये । एतेषां मध्ये संस्रावभागा इति सप्तर्चः जाग्मायनोद- [Gu$_1$ 41v] पात्रे वेदेरग्निकोणे सम्पातानानयेत् । एतदन्तं दिव्यमुत्तरतन्त्रं भवति । ततोऽन्तरग्नावि- त्यादिभिर्जुहुयात् ।

अथ यदा साम्पदं तन्त्रं चेच्चिकीर्षति तत ॐ प्रजापतिर्ऋषिरनुष्टुप्छन्द इन्द्रो देवता [Ni 36v] साम्पदसंस्थितहोमे विनियोग इति ज्ञात्वा । अग्नेऽभ्यावर्तिन्निति कण्डिका । अग्नेर्मध्य- भागे साम्पदान् संस्थितहोमान् प्रत्यृचं जुहुयात् । इमाश्चतस्र आज्याहुतयोऽग्नये । के- चिन्मन्त्रावृत्त्या वारत्रयमिति । एतावत्पर्यन्तं साम्पदमुत्तरतन्त्रं भवति । पूर्ववदन्तरग्ना- वित्यादिभिर्जुहुयात् ।

[Gu$_2$ 43r] अथ यर्हि प्रायश्चित्तीयं तन्त्रं कर्तुमिच्छति तर्हि दिव्यानन्तरमायुरग्न इति तृचेन सूक्तेन प्रत्यृचं प्रायश्चित्तीयान् संस्थितहोमान् जुहुयात् । इमास्तिस्र आज्याहुतयोऽग्नये । मन्त्रावृत्त्या वारत्रयमपरे । अग्नेऽभ्यावर्तिन्निति कण्डिकावर्जं एतदवसानं प्रायश्चित्तीय- मुत्तरतन्त्रं भवति । ततोऽन्तरग्नावित्येवमादीन् जुहुयात् ।

---

1 संस्रावभागाः PS 20.35.2–8 3–4 अन्तरग्नौ This is a *pratīka* for the *ācāryagaṇa*, whose definition appears below, p. 122 6 अग्नेऽभ्यावर्तिन् PS 1.41 10 आयुरग्ने PS 19.28.4–6 12 अग्नेऽभ्यावर्तिन् PS 1.41

---

1 इत्येकादशभिर्ऋग्भिर्दिव्य°] Gu$_2$, इत्येदशभि ऋग्भिर्दिव्य° Ni, इत्येकादशभि ऋग्भिर्दिव्य° Ku, इत्येका ॥ दशभिर्ऋग्भिर्दिव्य° Gu$_1$
1 जुहुयात्] NiKuGu$_2$, जुहुत Gu$_1$
1–2 उत्तरार्ध °°° ऽग्नये ।] om. Gu$_1$
1–2 उत्तरार्ध] Ni, उत्तरार्द्धे KuGu$_2$, lac. Gu$_1$
2 संस्रावभागा इति] em., संस्रावभागेति NiKu, संस्रावभागा Gu$_1$, षंस्रावभागेति Gu$_2$
2 सप्तर्चः] NiKuGu$_1$, सप्तर्च्चिः Gu$_2$
2–3 जाग्मायनोद°] NiGu$_1$, वजाग्मायनोद° Ku, °र्जाग्मायनोद° Gu$_2$
3–4 ततोऽन्तरग्नावि°] NiGu$_1$, ततोऽन्तरग्नादि° KuGu$_2$
5 चेच्चिकीर्षति] NiKu, चेच्चिर्षति Gu$_1$, च्चे_कीर्षति Gu$_2$
5 तत ॐ] NiKuGu$_2$, ततः Gu$_1$
7 इमाश्चतस्र °°° ऽग्नये ।] om. Gu$_1$Gu$_2$
7 इमाश्चतस्र आज्या°] em., इमाश्चतस्राज्या° NiKu, lac. Gu$_1$Gu$_2$
7–8 केचिन्मन्त्रावृत्त्या] corr., केचिन्मन्त्रावृत्या NiKu, मन्त्रावृत्या केचिन्मन्तावृत्या Gu$_1$, केचिन्मन्त्रमुक्त्वा Gu$_2$
8 वारत्रयमिति] NiKu, वारत्रयं Gu$_1$, वारत्रयेमिति Gu$_2$
8 एतावत्पर्यन्तं] NiKuGu$_1$, एतावभार्यन्तं Gu$_2$
8–9 °न्तरग्नावित्यादि°] em., °न्तरग्नादि° NiKuGu$_1$Gu$_2$
10 यर्हि] Gu$_2$, बर्हि NiKu, om. Gu$_1$
10 कर्तुमिच्छति तर्हि] NiKuGu$_2$, तर्हि कन्तुमिच्छति । तर्हि Gu$_1$
10 °नन्तरमायुरग्न इति] Ku, °नन्तरमायुरग्नमिति Ni, °नन्तरं अयुरग्न इति Gu$_1$, °नन्तरंमायुरग्नमि Gu$_2$
10 तृचेन] Ni, त्र्युचेन Ku, त्यृचेन Gu$_1$Gu$_2$
11 प्रत्यृचं] NiKuGu$_1$, प्रतिऋचेन Gu$_2$
11 संस्थितहोमान्] NiKuGu$_1$, om. Gu$_2$
11 इमास्तिस्र आज्याहुतयोऽग्नये ।] em., इमास्तिस्राज्याहुतयोऽग्नये । NiKu, om. Gu$_1$, इमातिस्राय्याहुतयोग्नये । Gu$_2$
12 अग्नेऽभ्यावर्तिन्निति] NiKuGu$_1$, अग्नेवर्त्तिन्निति Gu$_2$
12 एतदवसानं] NiKu, एतदशावसानं Gu$_1$, येतदवशानं Gu$_2$
13 ततोऽन्तरग्नावित्येवमादीन्] NiKu, ततोः अन्तरग्नावित्येवमादीन Gu$_1$, ततो अन्तराग्निवित्येवमादिना Gu$_2$

यत्र दिव्यसाम्पदप्रायश्चित्तीयैरेतत्त्रितयं कुर्यादिति प्रत्येकं विशेषवचनं दृश्यते तत्रायं तन्त्रभेदो व्यवहर्तव्य इति । यत्र तु विशेषवचनं नास्ति तत्रैषां त्रयाणां समुच्चयो [Ku 41v, Gu$_1$ 42r] भवति । यदा चेदं समुच्चयतन्त्रं कुर्वन्ति तदा पूर्वतन्त्रे दिव्यसाम्पदपुरस्ताद्धोमानन्तरं युक्तो युज्य इत्यादि कुर्वते । उत्तरतन्त्रे च दिव्यसाम्पदप्रायश्चित्तीयहोमानन्तरमन्तरग्नावित्यादिकं जुहुयादिति । चतुर्विचारपक्षे एष क्रमो भवति । द्विविचारपक्षे एतद्भेदो नास्तीति ।

ततोऽन्तरग्नावित्याचार्यगणेन प्रत्यृचमाज्यं जुहुयात् । आज्याभावे समिधोऽभ्यादध्यात् । एकामाहुतिमित्येके । ॐ ब्रह्मा ऋषिस्त्रैष्टुभं छन्दः परमात्मा देवता आचार्यगणहोमे विनियोग इति स्मृत्वा । अन्तरग्नावित्येका । यदस्मृतीति तिस्रः । अग्नौ पचत इति चतस्रः कल्पजाः । विश्वे देवा इदं हविर्यन्मे छिद्रं पुनर्मैत्विन्द्रियं यो देवानां यस्मात्कोशा- [Gu$_2$ 43v] दित्येकैका ऋक् । इति त्रयोदशानामृचामाचार्यगण इति नाम । इमास्त्रयोदशाज्याहुतयोऽग्नये ।

---

4 युक्तो युज्ये For the identification of this *pratīka*, cf. the note on p. 52   9 अन्तरग्नौ PS 19.44.3   9 यदस्मृति PS 20.8.9–10 & 20.9.1   9 अग्नौ पचते Unidentified. The *sakalapāṭha* is given in PVSP, p. 108 (corrected): अग्नौ पचते नमश्च ते वषट् ते । अग्ने यत्ते न्यूनं तस्मै ते नमः तस्मै ते स्वाहा ॥ अग्नौ पचते नमश्च ते वषट् ते । अग्ने यत्तेऽतिरिक्तं तस्मै ते नमः तस्मै ते स्वाहा ॥ अग्नौ पचते नमश्च ते वषट् ते । अग्ने यत्ते विरिष्टं तस्मै ते नमः तस्मै ते स्वाहा ॥ अग्नौ पचते नमश्च ते वषट् ते । अग्ने यत्ते समृद्धं तस्मै ते नमः तस्मै ते स्वाहा ॥   10 विश्वे देवा इदं हविः PS 19.35.1   10 यन्मे छिद्रम् PS 19.38.6   10 पुनर्मैत्विन्द्रियम् PS 3.13.6   10 यो देवानाम् PS 5.16.7   10–11 यस्मात्कोशात् PS 19.35.3

---

1 यत्र] NiKuGu$_1$, तत्र Gu$_2$
1 °त्तीयैरेतत्त्रितयं] NiGu$_2$, °त्तीयेरेतत्त्रयं Ku, °त्तीयानेतत्तन्त्रं त्रितयं Gu$_1$
2 व्यवहर्तव्य इति] em., व्यवहर्त्तत्वेति Ni, व्यवहकर्त्तव्येति Ku, व्यवहतव्येति Gu$_1$, व्यवहर्त्तव्येति Gu$_2$
2 तु] NiKuGu$_2$, om. Gu$_1$
3 पूर्वतन्त्रे] KuGu$_1$Gu$_2$, दिव्यतन्त्रे Ni
5 द्विविचारपक्षे] NiGu$_1$Gu$_2$, द्विवारपक्षे Ku
5–6 एतद्भेदो नास्तीति] NiGu$_2$, एतद्भेदो नास्ति Ku, एतदो नास्तितिति Gu$_1$
8 °दध्यात्] NiKuGu$_1$, °दद्यात् Gu$_2$
8 °माहुतिमि°] NiKuGu$_2$, °माहुतमि° Gu$_1$
8 ऋषिस्त्रैष्टुभं] NiKuGu$_2$, ऋषि त्रिष्टुभं Gu$_1$
9 विनियोग इति स्मृत्वा] NiKuGu$_2$, विनियोगः Gu$_1$
9 यदस्मृतीति] NiKuGu$_1$, यदस्मृति Gu$_2$
9 अग्नौ पचत] Ku, अग्नउ पच{•}त Ni, उग्नउ पर Gu$_1$, अग्ने उपचत Gu$_2$
10 चतस्रः] NiKuGu$_1$, तिस्रः Gu$_2$
11 °दित्येकैका] NiKu, °दितैकैका Gu$_1$, °दित्येकैकी Gu$_2$
11 °माचार्यगण] KuGu$_1$, °माचार्य Ni, °साचार्य Gu$_2$
11–12 इमास्त्रयोदशाज्याहुतयोऽग्नये ।] This sentence is omitted in Gu$_1$

ततो होता हुतं ते वाचीत्येका । यन्मे अग्न इति पञ्च कल्पजाः । इमाः पञ्चाज्या-
Gu$_1$ 42v हुतयोऽग्नये । अग्नये स्वाहा । यज्ञाय स्वाहा । ब्रह्मणे स्वाहा । विष्णवे स्वाहा । प्रजापतये
Ku 42r स्वाहा । एतैर्यथाक्रमेण चतुर्थ्यन्तेन त्यागः कार्यः । आज्यं जुहुयात् । एतन्मन्त्रमध्ये
मनसैव प्रजापतये जुहोति । ततस्त्रातारमिन्द्रमित्येका । इदमिन्द्राय । ययोरोजसेति तिस्र
इति प्रत्यृचमाज्यं जुहुयात् । इमास्तिस्र आज्याहुतयो विष्णवे वरुणाय । अन्ये चैकामा-
हुतिमिच्छन्ति ।

ततः कर्ता पूर्ववन्महाव्याहृत्यादिभिः पञ्चदशाहुतीर्होमयेत् । पूर्ववत्त्यागः । एकां वेति केचित् । एतत्सर्वमृत्विक्कर्मप्रायश्चित्तार्थं वदन्तीति ।

तत एतास्ते अग्न इत्यृचा समिच्छेषमग्नौ जुहुयात् । इदमात्मने ।

---

1 हुतं ते वाचि PS 16.72.8   1 यन्मे अग्ने The *sakalapāṭha* for this group of mantras is given in PVSP, p. 109 (we have corrected the readings by comparing attestations of the same or comparable mantras at TS 1.6.2.1–2; AthPrāy 2.6:85.6–9, 1.3:74.8–10, 4.1:105.6–10; KauśS 6.1; etc.): यन्मे अग्ने अस्य यज्ञस्य रिष्याद्यद्वास्कन्दाद्यदि वा विनश्येत् । सर्वं तदग्ने सुहुतमस्तु भागशः शिवान् वयमुत्तरेमाभि वाजान् ॥ यन्मे स्कन्नं मनसो जातवेदो यद्वास्कन्दद्धविषो यत्रयत्र । उत्प्रुषो विप्रुषः संजुहोमि सत्याः सन्तु यजमानस्य कामाः ॥ त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ॥ स त्वं नो अग्नेऽवमो भवोती नेदिष्ठोऽस्या उषसो व्युष्टौ । अव यक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा ॥ यत्किञ्चिद्व्यतिक्रान्तमाचार्यवचनमस्मृतम् । आचार्या माभिरक्षतु वाग्देवी सरस्वती स्वाहा ॥ 4 त्रातारमिन्द्रम् PS 5.4.11   4 ययोरोजसा PS 20.15.10 & 20.16.1–2   9 एतास्ते अग्ने According to PVSP, p. 110, this *pratīka* denotes a variant upon ŚS 19.64.4: एतास्ते अग्ने समिधस्ताभिष्ट्वं सुसमिद्धव । आयुरस्मासु धेह्यमृतत्वमाचार्याय स्वाहा ॥

---

1 होता] KuGu$_1$Gu$_2$, om. Ni
1 यन्मे अग्न] NiKuGu$_1$, यग्मे यने ॥ ॥ यन्मे अग्ने Gu$_2$
1 कल्पजाः] corr., कल्पजा NiKuGu$_1$Gu$_2$
1–2 इमाः पञ्चाज्याहुतयोऽग्नये ।] This sentence is omitted in Gu$_1$
2 विष्णवे] NiKuGu$_1$, विष्णुवे Gu$_2$
3 एतैर्यथाक्रमेण ◦◦◦ जुहुयात्] NiKu, एतैराज्यं जुहुयात् Gu$_1$Gu$_2$
3 एतन्मन्त्रमध्ये] NiKu, एतन्मध्ये Gu$_1$, एतै मन्त्रमध्ये Gu$_2$
4 मनसैव] NiKu, मनस्यैव Gu$_1$, मनस्यै Gu$_2$
4 जुहोति] NiKu, जुहुयात् Gu$_1$, युहुया ॥ ॥ युहोति Gu$_2$
4 तत◦] NiKuGu$_1$, त◦ Gu$_2$
4 इदमिन्द्राय ।] Gu$_1$ and Gu$_2$ omit this sentence
5 इमास्तिस्र आज्याहुतयो विष्णवे वरुणाय ।] Gu$_1$ omits this sentence
5 इमास्तिस्र आज्याहुतयो] em., इमास्तिस्राज्याहुतयो NiKu, lac. Gu$_1$, इमास्त्रिश्राज्याहुतयो Gu$_2$
5 विष्णवे वरुणाय] NiKu, lac. Gu$_1$, विष्णव इति Gu$_2$
5 अन्ये] NiKuGu$_2$, तन्वे Gu$_1$
7 पूर्ववन्महाव्याहृत्यादिभिः पञ्च◦] NiKu, माहाव्याहृतिसावित्रिशान्तिब्रह्मयज्ञानैः पूर्वत्पञ्च◦ Gu$_1$, पूर्वमहाव्याहृत्यादिभिः पञ्च◦ Gu$_2$
8 पूर्ववत्त्यागः ।] Gu$_1$ and Gu$_2$ omit this sentence
8 वेति] NiKuGu$_2$, वा Gu$_1$
8 एतत्सर्वमृत्विक्कर्म◦] NiKu, एतत्सर्वं Gu$_1$, एतत्सर्वं कर्म◦ Gu$_2$
8 ◦प्रायश्चित्तार्थं] Ni, प्रायश्चित्तीयार्थं Ku, प्रायश्चितार्थं Gu$_1$, प्रायश्चित्ता{●}र्थ Gu$_2$
9 वदन्तीति] NiKuGu$_2$, वदन्ति Gu$_1$
9 इत्यृचा] NiKuGu$_1$, त्यृचा Gu$_2$
9 इदमात्मने ।] Gu$_1$ omits this sentence

अथाज्यस्थालीस्थितसंस्कृताज्यं स्रुवं पूरयित्वा तस्योपरि दूर्वाक्षतं नारिकेलफलं च दत्त्वा । ॐ विश्वकर्मा ऋषिरनुष्टुप्छन्दः सूर्यो देवता पूर्णाहुतौ विनियोग इति ध्यात्वा । सहस्रशृङ्ग इत्यृचं पठित्वा यथाविधिवत्कृशानुं ध्यात्वैव चतुरवत्तधर्मेण जुहुयात् । इदं सूर्याय । चतुरवत्तधर्मस्थान उक्तम् । Gu$_2$ 44r

तत्र चायं विधिः कार्यः पूर्णहोमेन चाप्यथ । Ku 42v, Ni 37v

इति वचनाच्चतुरवत्तधर्मेणैव होतव्येति । एषा पूर्णाहुतिरित्युच्यते ।

पवित्रं शतधारमिति कल्पजर्चा समित्कं पवित्रं प्रागग्रमग्नौ जुहुयात् । इमं च पवित्रहोमं केचिन्न स्वीकुर्वन्ति । उत्सूत्रत्वात् । यजमानपत्न्यञ्जलिस्थजलेन पत्नीस्नपने Gu$_1$ 43r

---

3 सहस्रशृङ्गः PS 18.16.2   7 पवित्रं शतधारम् Unidentified. The *sakalapāṭha* is given in PVSP, p. 111 (emended): पवित्रं शतधारं दर्भं सत्यजितं शुभम् । अस्मै यज्ञाय जुहूमस्तेन पुष्यतु नो रयिः ॥

---

5 Cf. p. 111.

---

1 अथाज्यस्थालीस्थितसंस्कृताज्यं] Ku, अथाज्यस्थालीस्थितसंस्कृतसंस्कृताज्यं Ni, अथज्यस्थालीस्थितं संस्कृताज्यं Gu$_1$, अथाज्यस्थालीस्थितं संस्कृताताज्यं Gu$_2$
1 नारिकेलफलं] NiKu, नारिकेलादिफलं Gu$_1$, नरिकेलफलं Gu$_2$
2 ऋषिरनुष्टुप्छन्दः] Ku, ऋषि अनुष्टुभं छन्दः NiGu$_1$, ऋषिरनुष्टुभं छन्दः Gu$_2$
2 पूर्णाहुतौ] NiKuGu$_1$, पुर्ण्णहोमे Gu$_2$
2 ध्यात्वा] NiKuGu$_1$, स्मृत्व Gu$_2$
3 सहस्रशृङ्ग] em., सहस्रशृङ्गा NiKuGu$_1$, सहश्रशृगं Gu$_2$
3 इत्यृचं] NiKuGu$_2$, इति त्यृचं Gu$_1$
3 °वत्कृशानुं] Ni, °वत्कृशानु Ku, °वकृशानं Gu$_1$, °वत्कृत्वानु° Gu$_2$
3 चतुरवत्तधर्मेण] em., चतुरवद्धर्म्मेण NiKuGu$_1$, चतुरवधर्मेण Gu$_2$
3–4 इदं सूर्याय ।] NiKuGu$_2$, om. Gu$_1$
4 चतुरवत्तधर्मस्थान उक्तम्] corr., चतुरवत्तद्धर्मस्थाने उक्तं Ni, चतुरवद्धर्मस्थाने उक्तं Ku, om. Gu$_1$, चतुरवधर्मस्थान उक्तंः Gu$_2$
5–6 पूर्णहोमेन चाप्यथ ॥ इति वचनातच्च°] corr., पूर्णहोमेनावाप्यथेतिवचनात् च° Ni, पूर्णहोमेनाप्यथेत्रिवचनात् ॥ च° Ku, पूर्णहोमेन चाप्यथ इतिवचनात् ॥ Gu$_1$, पूर्ण्णहोमेन वाप्थेतिवचनाच्च° Gu$_2$
6 चतुरवत्तधर्मेणैव होतव्येति ।] This part of the sentence is omitted in Gu$_1$
6 °रवत्तधर्मेणैव] Ni, °रवदधर्मेणैव Ku, lac. Gu$_1$, °रवधर्मेणैव Gu$_2$
6 होतव्येति] NiKuGu$_2$, lac. Gu$_1$
6 एषा] Gu$_1$, एषां NiKu, एषं Gu$_2$
7 समित्कं] NiKuGu$_1$, समिकं Gu$_2$
7 प्रागग्रमग्नौ] em., प्राच्यश्रमग्नौ Ni, प्राच्यमग्नौ Ku, प्राच्यग्रमग्नौ Gu$_1$, प्राग्रमग्नौ Gu$_2$
7 इमं] NiKuGu$_1$, एम Gu$_2$
7 च] NiGu$_1$Gu$_2$, om. Ku
8 स्वीकुर्वन्ति] NiKuGu$_1$, स्वीकरोति Gu$_2$
8 उत्सूत्रत्वात्] NiKuGu$_1$, उत्सूतत्वात् Gu$_2$
8 यजमानपत्न्यञ्जलिस्थजलेन] Ni, यजमानस्य पत्न्यञ्जलिस्थजलेन Ku, यजमानपत्न्यञ्जलिस्थजले{●} Gu$_1$, यजमानपत्न्याञ्जलीस्थजलेन Gu$_2$
124.8–125.1 °स्नपने प°] NiKuGu$_1$, °स्नपनेनाप° Gu$_2$

पवित्रस्य विनियोगाच्च । ततः कर्ता आयुर्मा विशत्विति पञ्चदशभिर्मन्त्रैर्धूमं हस्तेनाकर्षयन्निव प्रदक्षिणमेव स्वीकरोति ।

ततो यदा यजमानस्य पत्नी विद्यते वेदेः पश्चिमोत्तरस्थितायास्तस्या हस्तौ
प्रक्षाल्य । स्रुवसमौ दर्भौ स्रुवं च यजमानस्य पत्न्यञ्जलौ निधाय । इन्द्रस्य वचसेति
कल्पजाभ्यां जाग्मायनमुदपात्रमुत्थाप्यापो हि ष्ठेति त्र्यृचेन सूक्तेन पत्न्यञ्जलौ निवर्जयेत् ।
[Gu$_2$ 44v] इह वर्च इत्यृचा ताभ्यां दर्भाभ्यां तस्या एवाञ्जलिस्थाभिरद्भिः स्वात्मीयेन दक्षिणहस्तेन
तस्या मूर्धन्यभिषिञ्चेत् । इह केचिदाज्यस्थितपवित्रेण तदभिषेचनं कामयन्ते । ततो
यजमानस्य पत्नी यदप्सु ते सरस्वतीत्यृचं कर्ता पठति । स्वयं पाणिभ्यां भूमिमापीड्य
[Ku 43r] स्वमुखं स्पृशति । ततोऽदब्धं म इत्यादिकं कुर्यात् ।

---

1 आयुर्मा विशतु Unidentified. The *sakalapāṭha* is given in PVSP, p. 111 (corrected): आयुर्मा विशतु । वर्चो मा विशतु । तेजो मा विशतु । सहो मा विशतु । श्रद्धा मा विशतु । मेधा मा विशतु । दीक्षा मा विशतु । धृतिर्मा विशतु । स्मृतिर्मा विशतु । पुष्टिर्मा विशतु । बलं मा विशतु । व्रतं मा विशतु । व्रतपतिर्मा विशतु । सर्वं मा विशतु । सर्वमायुरशीय । 4 इन्द्रस्य वचसा This *pratīka* does not denote PS 19.6.2–3, but a pair of mantras of which the first is attested at KauśS 6.17, and the second, with minor variants, in the प्रायश्चित्तमन्त्र from AVPariś 37.19.4–5 used below, on p. 138, as is clear from the *sakalapāṭha* in PVSP, p. 111 (corrected): इन्द्रस्य वचसा वयं मित्रस्य वरुणस्य च । ब्रह्मणा स्थापितं पात्रं पुनरुत्थापयामसि । विश्वैर्देवैरभिष्टुतमूर्जं पुष्टिं दधातु मे । रायस्पोषं ध्रुवां श्रियं मयि कर्म च सिध्यतु ॥ 5 आपो हि ष्ठा PS 19.45.8–10 6 इह वर्चः PS 20.23.10 8 यदप्सु ते सरस्वति PS 20.28.1 9 अदब्धं मे See the next entry

---

1 कर्ता] NiKuGu$_2$, om. Gu$_1$
1 विशत्विति] NiKuGu$_1$, विशविति Gu$_2$
1 पञ्चदशभिर्मन्त्रैर्धूमं] NiGu$_2$, पञ्चदशभिर्द्धूम Ku, पञ्चदशभिमन्त्रैर्दधूमं Gu$_1$
1–2 हस्तेनाकर्ष°] NiKuGu$_2$, हस्तेन कर्ष° Gu$_1$
2 प्रदक्षिणमेव] NiGu$_2$, om. Ku, प्रदक्षिणमिव Gu$_1$
2 स्वीकरोति] NiKuGu$_1$, स्मीकरोति Gu$_2$
3 यदा] NiGu$_1$Gu$_2$, om. Ku
3 विद्यते] KuGu$_1$Gu$_2$, न विद्यते Ni
3 पश्चिमोत्तरस्थितायास्तस्या] corr., पश्चिमोरस्थितायाः तस्या Ni, पश्चिमोत्तरदेशे स्थितायाः तस्या Ku, पश्चिमोत्तरस्थितायास्तस्य Gu$_1$, पश्चिमोत्तरोस्थितायाः तस्या Gu$_2$
4 °समौ] NiGu$_1$Gu$_2$, °सस्थौ Ku
4 पत्न्यञ्जलौ] Ku, पत्न्याञ्जलौ NiGu$_1$Gu$_2$
5 जाग्मायन°] NiKuGu$_1$, जग्मायन° Gu$_2$
5 त्र्यृचेन] NiKu, त्यृचेन Gu$_1$, तृचेन Gu$_2$
5 पत्न्यञ्जलौ] NiGu$_1$, पत्न्याञ्जलौ Ku, पूत्न्याञ्जलौ Gu$_2$
6 इत्यृचा ताभ्यां] NiGu$_1$Gu$_2$, इत्यृचाभ्यां Ku
6 दर्भाभ्यां] NiGu$_1$, om. Ku, दर्भाभ्यांः Gu$_2$
6 °त्मीयेन] em., °त्मायेन NiKu, °त्मायन Gu$_1$, °त्माएन Gu$_2$
7 तस्या] NiKuGu$_1$, तस्य Gu$_2$
7 मूर्धन्यभि°] NiGu$_1$, मूर्द्धिन्याभि° Ku, मूर्ध्निन्यभि° Gu$_2$
7 इह केचिदाज्यस्थितपवित्रेण तद°] corr., इह केचिदाज्यस्थितपवित्रेणेतद° NiGu$_2$, इह केचिदाज्यस्थितपवित्रेणद° Ku, इहेकचिदाज्यस्थितपवित्रेण तद° Gu$_1$
7 कामयन्ते] NiGu$_1$Gu$_2$, कारयन्ते Ku
8 पठति ।] NiGu$_1$Gu$_2$, om. Ku
8 भूमिमापीड्य] NiKuGu$_2$, र्भुमिमीपीड्य Gu$_1$
125.9–126.3 ततोऽदब्धं म इत्यादिकं कुर्यात् । °°° विसृजेत् । ततोऽदब्धं म इत्यादिं समानानां] Ni and Gu$_1$ show omission, possibly due to eye-skip, of three sentences up to विसृजेत्

ततो यदा गोदानादिषु यजमानस्य पत्नी न विद्यते तदायुर्मा विशत्विति धूमस्वीकरणं कुर्यात् । इन्द्रस्य वचसेति द्वाभ्यामृग्भ्यां जाग्मायनोदपात्रजले स्रुवं प्रक्षाल्य विसृजेत् । ततोऽदब्धं म इत्यादि समानानां भूयासमित्यन्तैर्मन्त्रैर्मन्त्रोक्तानि गात्राण्यालभते ।

ततः कर्ता अन्तरोदपात्रोदकं हस्तेनालभ्य । त्र्यायुषमित्यृचा यद्देवानां त्र्यायुषं तन्मे Gu$_1$ 43v अस्तु शतायुषमिति एतावत् पुरोवर्तिवह्निभस्मना ललाटे ग्रीवायां च तिलकं कुर्यात् । Ni 38r, Gu$_2$ 45r तदनन्तरं वाङ्म आसन्नसोरित्यादि सर्वमायुरशीयेति प्रान्तैर्मन्त्रैः पूर्ववन्मन्त्रोक्तान्यङ्गानि प्रतिमन्त्रयेत् ।

ततः स्योनं मे सीदेति द्वाभ्यामृग्भ्यां वेदिबाह्ये हविःस्थानादुत्तरतः स्रुवं प्राग्दण्डं

---

3 अदब्धं मे ◦◦◦ समानानां भूयासम् A clumsy or corrupt compilation of PS 10.9.3 and PS 18.45+46. The *sakalapāṭha* is given in PVSP, p. 112 (partly emended): अदब्धं मे चक्षुः सुश्रुतौ ?मे कर्णौ भद्रः सुश्रुतौ? मे कर्णावक्षितौ मे प्राणापानौ हृदया जरसं मा मा हासीः । असन्तापं मे हृदयमस्तु । उर्वी गव्यूतिः समुद्रोऽस्मि विधर्मणा नाभिरहं रयीणां नाभिरहं समानानां भूयासम् ॥ 5–6 त्र्यायुषम् ◦◦◦ यद्देवानां त्र्यायुषं तन्मे अस्तु शतायुषम् Unidentified (cf. PS 2.59.5, from which the unusual mode of reference means to distinguish this mantra). The *sakalapāṭha* is given in PVSP, p. 112: त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवानां त्र्यायुषं तन्मे अस्तु शतायुषम् ॥ 7 वाङ्म आसन्नसोः ◦◦◦ सर्वमायुरशीय Cf. the partly corrupt mantras at ŚS 19.60.1–2 & 19.61.1b. A *sakalapāṭha* showing some variants from the ŚS reading is given in PVSP, p. 112, and is confirmed by our ms. KS/Gu$_1$. Comparing the various sources we restore the mantra as follows: वाङ्म आसन्नसोः प्राणः चक्षुरक्ष्णोः श्रोत्रं कर्णयोः । अपलिताः केशा अशोणा दन्ता ओजो दोष्णोरंसयोर्वीर्यं बाह्वोर्बलम् । तेजश्च मेधा हृदयेऽविरिष्टं मध्यमात्मन्यात्मानन्दमुपस्थे बलमुर्वोरोजो जानुनोर्जङ्घयोर्जवः गुल्फयोः पादयोः प्रतिष्ठारिष्टानि मे विश्वान्यङ्गानि सन्तु । तनूस्तन्वा मे सहेदं सर्वमायुरशीय ॥ 9 स्योनं मे सीद The *sakalapāṭha* for this collage of mantras or elements thereof known in Vedic literature (the most significant parallels being ŚS 19.61.1c, KauśS 6.10, TB 3.7.6.8–9) is given in PVSP, p. 112 (emended): स्योनं मे सीद पुरुः पृणस्व सुषदः पृथिव्यामुरुः पृथुः स्वर्गे । स्रुवोऽसि घृतादनिशितः । सपत्नक्षयणो दिवि सीद । अन्तरिक्षे सीद पृथिव्यां सीदोत्तरोऽहं भूयासमधरे मत्सपत्नाः । आ रोह पथो दिवि देवयानान् यत्र ऋषयः प्रथमजाः पुराणाः । हिरण्याङ्गा अजराः संभृतश्रीर्वहसि मां सुकृतां यत्र लोकः । तत्रेमं यज्ञं यजमानं च वर्धय ॥

---

1 तदायुर्मा] Ku, lac. NiGu$_1$, तदी आयुर्मा Gu$_2$
2 वचसेति] Gu$_2$, lac. NiGu$_1$, वचसीति Ku
2 द्वाभ्यामृग्भ्यां] corr., lac. NiGu$_1$, द्वाभ्यां Ku, द्वाभ्यामृग्भ्या Gu$_2$
2 ◦यनोदपात्रजले] em., lac. NiGu$_1$, ◦यनमुदपात्रजलं Ku, जाग्मायनमुदपात्रजले Gu$_2$
3 विसृजेत्] Ku, lac. NiGu$_1$, विस्मृजेत Gu$_2$
3 ततोऽदब्धं म इत्यादि] NiGu$_1$Gu$_2$, ततोऽदब्ध म Ku
3 समानानां] Gu$_1$, समानां NiKu, समानाना Gu$_2$
3 भूयासमित्यन्तैर्मन्त्रै◦] NiGu$_1$, भूयासमित्येतैमन्त्रै◦ Ku, भूयासमित्येन्तैर्मन्त्रै◦ Gu$_2$
3–4 गात्राण्यालभते] Ni, गात्राण्यालभ्यते Ku, गात्रान्यालभते Gu$_1$, गान्यालभ्यते Gu$_2$
5 यद्देवानां] NiKuGu$_1$, यदेवानां Gu$_2$
6 ◦भस्मना] NiGu$_1$Gu$_2$, ◦भस्म Ku
6 च] KuGu$_1$, om. NiGu$_2$
7 वाङ्म] NiKuGu$_2$, वाङमु Gu$_1$
7 आसन्नसोरित्यादि] em., आस्यं नस इत्यादि NiGu$_1$, आस्यन्नस इत्यादि KuGu$_2$
7 परान्तै◦] NiKuGu$_1$, पात्रै◦ Gu$_2$
8 प्रतिमन्त्रयेत्] NiGu$_1$Gu$_2$, मन्त्रयेत् Ku
9 ततः] NiKuGu$_2$, om. Gu$_1$
9 हविःस्थानादुत्तरतः] Ni, हविस्थानानतरतः

संस्थाप्य । ॐ स्रुवाय नम इति गन्धपुष्पादिनाभ्यर्च्य ।

ॐ मेधातिथिर्ऋषिस्त्रिष्टुपछन्दः पृथिवी देवता वेद्या बहिर्निष्क्रमणे विनियोग इति ध्यात्वा । उदीराणा इत्यृचमुक्त्वोत्थाय वेद्या उत्तरेण निष्क्रम्य । दक्षिणतो गत्वा । दक्षिणहस्तेन त्रिषु क्रमणस्थानेषु दर्भान्निरन्तरं निपात्य । विष्णोः क्रमोऽसीति त्रिभिः प्र- Ku 43v पाठकैः स्तृतदर्भस्थानैः पृथिव्यन्तरिक्षदिव्यानि ध्यात्वा यथासंख्यं दक्षपादादिक्रमेण त्रीन् विष्णुक्रमान् क्रमते ।

ततः सुभूरसीति कण्डिका यद्राजानमिति चतुष्केण सूक्तेनादित्यं पश्यन्नुपतिष्ठेत् । Gu$_1$ 44r रात्रावग्निमुपतिष्ठेत् । अथ वा मेघच्छन्नेऽह्नि अग्निमुपतिष्ठेत् । तत ॐ प्रजापतिर्ऋषिर्मुक्तकं छन्दः विष्णुर्देवता परिभ्रमणे विनियोग इति स्मृत्वा । सूर्यस्यावृतमिति त्रिभिरवसानैः क्षुद्रपठितैर्दक्षिणाङ्गुष्ठं दक्षिणस्कन्धे निधाय प्रदक्षिणमावर्त्य । उत्तिष्ठ ब्रह्मणस्पत इति Gu$_2$ 45v कल्पजर्चाभ्यर्चनपूर्वकं करस्पर्शेन ब्रह्माणं विसृज्य । ॐ ब्रह्मानुष्टुप्परमात्मेति परिशिष्टवचनाद्यस्मात्कोशादित्यृचमुक्त्वा स्वहृदयमभिमन्त्रयेत् ।

---

3 उदीराणाः PS 17.3.7 4 विष्णोः क्रमोऽसि PS 16.131.1–3 7 सुभूरसि PS 18.48 7 यद्राजानम् PS 19.24.17–20 9 सूर्यस्यावृतम् PS 16.132.2 10 उत्तिष्ठ ब्रह्मणस्पते Unidentified. The *sakalapāṭha* is given in PVSP, p. 114: उत्तिष्ठ ब्रह्मणस्पते देवान् यज्ञेन बोधय । आयुः कीर्तिं यशः पुष्टिं यजमानस्य वर्धय ॥ 12 यस्मात्कोशात् PS 19.35.3

---

Ku, हविःस्थानादुत्ततः Gu$_1$, हविस्थानादुत्तरतः Gu$_2$
1 संस्थाप्य] NiKuGu$_2$, स्थाप्य Gu$_1$
1 इति] NiKuGu$_1$, om. Gu$_2$
2 मेधातिथिर्ऋषिस्त्रिष्टुपछन्दः] corr., मेधातिथि ऋषिस्त्रिष्टुभं छन्दः NiKu, मेधातिथि ऋषि त्रिष्टुभं छन्दः Gu$_1$, मेधा ऋषिस्त्रिष्टुप्छन्दः Gu$_2$
2 वेद्या] Gu$_2$, वेद्यां NiGu$_1$, पृथिव्यां Ku
3 उदीराणा] KuGu$_1$Gu$_2$, उदीराराणा Ni
3 इत्यृचमुक्त्वोत्थाय] NiKuGu$_1$, त्यृचमुक्त्वा उत्थाय Gu$_2$
3 दक्षिणतो] NiKuGu$_2$, दक्षितो Gu$_1$
4 °हस्तेन त्रिषु] NiKuGu$_1$, हस्तेसु Gu$_2$
5 स्तृत°] NiGu$_1$, स्तृणीत° Ku, स्तृणित° Gu$_2$
5 °दिव्यानि] NiKuGu$_2$, °दिव्यादि Gu$_1$
5 दक्ष°] NiKuGu$_1$, दक्षिण° Gu$_2$
6 क्रमते] NiKuGu$_1$, क्रमयेत् Gu$_2$
8 रात्रावग्नि °°° मेघच्छन्नेऽह्नि अग्निमुपतिष्ठेत् ।] Gu$_2$ interchanges the order of these two sentences
8 रात्रावग्नि°] NiKuGu$_1$, रात्रावह्नि° Gu$_2$
8 °तिष्ठेत्] NiKuGu$_1$, °तिष्ठे Gu$_2$
8 मेघच्छन्ने] Ni, मेघाछन्ने Ku, मेपछन्ने Gu$_1$, मेघछन्ने Gu$_2$
8–9 प्रजापतिर्ऋषिर्मुक्तकं] corr., प्रजापति ऋषिर्मुक्तं NiKu, प्रजापति ऋषिर्मुक्तकं Gu$_1$Gu$_2$
9 विनियोग इति स्मृत्वा ।] NiKuGu$_2$, विनियोगः । Gu$_1$
9 सूर्यस्यावृतमिति] NiKuGu$_2$, सूर्यस्यावृत Gu$_1$
10 °र्दक्षिणाङ्गुष्ठं] Ni, °र्दक्षिणाङ्गुष्टं Ku, °दक्षिणाङ्गुष्ठाग्रं Gu$_1$, °र्दक्षिणाङ्गुष्ठ Gu$_2$
11 ब्रह्मानुष्टुप्परमात्मेति] em., ब्रह्मा ऋषिऽनुष्टुप्छन्दः परमात्मेति Ni, ब्रह्मा ऋषिरनुष्टुप्छन्दः परमात्मेति Ku, ब्रह्म ऋषिं अनुष्टुप्छन्दः परमात्मा देवता हृदयाभिमन्त्रणे विनियोग इति Gu$_1$, ब्रह्मानुष्टु{●}प्पमात्मा देवताति Gu$_2$
12 स्वहृदयमभिमन्त्रयेत्] Ni, स्वहृदयमभिमभिमन्त्रयेत् Ku, स्वाहृदयभिमन्त्रयेत् Gu$_1$, स्वहृदयाभिमन्त्रये Gu$_2$

ततो यथार्थं कुर्वीरन्निति सूत्रकारवचनात्प्राशनादि यत्किंचित्तदत्र भवति। वचना- Ni 38v
भावादन्यत्र न भवति।

क्षमस्वाग्न इत्युक्त्वा हुतभुङ्मन्त्रेणाग्निं विसर्जयेत्। मन्त्रो यथा।

हुतभुक्त्वं वरेण्यस्त्वं प्रणतार्तिहर प्रभो।
व्रजस्व पूजामादाय पुनरागमनाय च॥

ततः कर्ता सदस्यैः सहितो यजमानस्य कल्याणमस्त्वित्यवधार्य स्वैरीभवेदिति।
तन्त्रलिङ्गविदोऽपि केचिदाहुः।

इध्मा बर्हिरुदपात्रं सम्पाता आज्यमेव च। Ku 44r
पुरस्तात्संस्थितहोमाश्च षड्विधा तन्त्रचोदनेति॥

**इति श्रीमन्नृसिंहचरणपरिचारकश्रीमन्महोपाध्यायश्रीधरविरचितायां विवाहादिकर्मपञ्जिकायां पाकयज्ञिकं नामोत्तरतन्त्रं समाप्तम्।** $Gu_1$ 44v

---

1 यथार्थं कुर्वीरन् Cf. AthPrāy 2.9:94.9 एतां जप्त्वा यथार्थं कुर्यात् and Kauśikapaddhati on 28.10 अन्यत्सर्वं यथार्थं कुर्यात्

---

1 सूत्रकारवचनात्प्राशनादि] Ku, सूत्रकारवचनाप्राशनादि Ni, सूत्रकारवचनात्। प्राश्नादि $Gu_1$, सूत्रकारवचनात्प्रासनदि $Gu_2$
1 यत्किंचित्तदत्र] Ni, त्किंचित्तदत्र Ku, यत्किंचितदत्र $Gu_1$, यत्किञ्चत्तत्र $Gu_2$
1–2 वचनाभावादन्यत्र न भवति] em., वचनादन्यत्र न भवति Ni, वचनादन्यत्र भवति $KuGu_1Gu_2$
3 क्षमस्वाग्न] $NiKuGu_1$, क्षमत्स्वग्न $Gu_2$
3 हुतभुङ्मन्त्रेणाग्निं] NiKu, हुतभुङ्मन्तेग्निं $Gu_1$, हुतभुन्मन्त्रेसाग्नि $Gu_2$
4 हुतभुक्त्वं] $KuGu_1$, हुतभुक्तं Ni, हुतभुक्त $Gu_2$
4 वरेण्यस्त्वं] $NiKuGu_2$, वरेन्यं त्वं $Gu_1$
4 प्रणतार्तिहर] $KuGu_1$, प्रणदार्त्तिहर Ni, प्रणतर्त्ति हरे $Gu_2$
4 प्रभो] $NiKuGu_1$, प्रभू $Gu_2$
5 °रागमनाय] $KuGu_1Gu_2$, °रायगमनाय Ni
6 सदस्यैः] $NiKuGu_2$, सदस्यः $Gu_1$
6 यजमानस्य कल्याणमस्त्वित्यवधार्य] $Gu_1$, यजमानकल्याणमस्त्वित्यवधार्य Ni, यजमानस्य कल्याणमस्त्विति अवधार्य Ku, यजमानस्य कल्याणमस्त्विति वधार्य $Gu_2$
6 °भवेदिति।] $Gu_1$, °भवेत् इति॥ Ni, °भवेत्॥ इति॥ Ku, °भवेत्। $Gu_2$
7–8 तन्त्रलिङ्गविदोऽपि °°° तन्त्रचोदनेति] $Gu_1$ inserts this sentence and the following verse after the chapter colophon
7 तन्त्र°] Ni, मन्त्र° Ku, तत्र° $Gu_1$, तत° $Gu_2$
7 केचिदाहुः] $NiKuGu_1$, केचिदाहु॥ कं शक्ते॥ $Gu_2$
9 °होमाश्च] $NiGu_1$, °होमश्च Ku, °होमा $Gu_2$
9 षड्विधा] $NiKuGu_1$, शड्वधा $Gu_2$
9 तन्त्रचोदनेति] $NiKuGu_1$, तन्त्रश्चेदनेति $Gu_2$
10 °नृसिंह°] $NiKuGu_1$, श्रीनु{●}सिंह° $Gu_2$
11 विवाहादिकर्मपञ्जिकायां] Ni, विवाहकर्मपञ्जिकायां $KuGu_1$, om. $Gu_2$
11 पाकयज्ञिकं नामोत्तरतन्त्रं] $NiKuGu_2$, पाकयज्ञकमुत्तरतन्त्रं $Gu_1$

(7)

# द्विविधस्थण्डिलविधानम्

शरच्चन्द्रनिभं देवं नृसिंहं पीतवाससम् ।
चक्रं पिनाकमभयं वरं शेषाङ्कगोऽवतु ॥
स्थण्डिलं स्थण्डिले चाज्यहवनं कथ्यतेऽधुना ।
अष्टौ शान्त्युदका यस्मिन् सिध्यन्ति कर्मभेदतः ॥

$Gu_2$ 46r अथ स्थण्डिलविधानमुच्यते । अव्यसश्चेत्यृचमुक्त्वा । आप्लुत्य हिरण्यवर्णाभिरित्यादि वेद्यर्थं भूपरिग्रहान्तं पूर्ववत्कर्म कुर्यात् । तत उत्तरवेदिवद्वेदिं कारयित्वा । इन्द्रः सीतेत्यादिसमिद्धोऽग्निरित्यनुमन्त्रणान्तं पूर्ववत् । तत आपोमयं ब्रह्माणं पूर्ववन्मन्त्रेण स्थापयित्वा । ब्रह्मजपानन्तरं प्रधानं कर्म कुर्यात् ।

---

5 अव्यसश्च PS 19.35.2

---

5–6 आप्लुत्य हिरण्यवर्णाभिरित्यादि °°° भूमिपरिग्रहान्तं पूर्ववत्कर्म कुर्यात् Cf. pp. 50–54.

6 उत्तरवेदिवत् Cf. the *vedilakṣaṇa*, p. 56.

7 इन्द्रः सीतेत्यादि समिद्धोऽग्निरित्यनुमन्त्रणान्तं पूर्ववत् Cf. pp. 57–71.

7–8 आपोमयं ब्रह्माणं °°° ब्रह्मजपानन्तरं Cf. pp. 71–73.

---

2 शेषाङ्क°] $NiKuGu_1$, श्येपाङ्क° $Gu_2$
3 स्थण्डिले चाज्य°] $KuGu_1$, स्थण्डिलेनाज्य° $NiGu_2$
4 सिध्यन्ति] $NiKuGu_1$, सिध्यनि $Gu_2$
5 °चेत्यृचमुक्त्वा] $NiKuGu_2$, °चेत्युक्त्वा $Gu_1$
5–6 °वर्णाभिरित्यादि] $NiKuGu_1$, °वण्र्णारित्यादि $Gu_2$
6 वेद्यर्थं] $NiKuGu_2$, वेदिकरणार्थं $Gu_1$
6 भूपरिग्रहान्तं] Ni, परिग्रहान्तं Ku, भूमिपरिग्रहान्तं $Gu_1$, भूमीपरिग्रहान्तं $Gu_2$
6 पूर्ववत्कर्म कुर्यात्] NiKu, कर्म्म पूर्ववत्कुर्यात् $Gu_1$, पूर्ववत्कर्म कुर्या $Gu_2$
6 तत] $NiKuGu_2$, om. $Gu_1$
6 उत्तरवेदिवद्वेदिं] $NiKuGu_2$, उत्तरवेदिंवद्विं $Gu_1$
7 समिद्धोऽग्नि°] $Gu_2$, समिधोऽग्नि° $NiKuGu_1$
7 °रित्यनुमन्त्रणान्तं पूर्ववत्] $NiKuGu_2$, °रित्यन्तं पूर्ववत्कर्म्म कुर्यात् $Gu_1$
7 तत] $NiKuGu_2$, तत्र $Gu_1$
7 ब्रह्माणं] $KuGu_1Gu_2$, ब्राह्मणं Ni

अथोत्तरतन्त्रम् । ये देवा इति तिसृभिरग्निं स्विष्टकृतमित्यृचाच समिधो हुत्वा । [$Gu_1$ 45r] स्वस्तिवाचनं कृत्वा । दक्षिणादानं च । ततः कर्ता यत्किञ्चिदित्यृचा समिधं हुत्वा । [Ni 39r] पूर्ववदायुर्मा विशत्विति कर्म कृत्वा । अदब्धं म इत्यादि भस्मवन्दनान्तं पूर्ववत् । उदीराणा इत्युत्थाय । सूर्यस्यावृतमिति परिभ्रमणं करोति । उत्तिष्ठ ब्रह्मणस्पत इति ब्रह्म- [Ku 44v] विसर्जनं करोति । यस्मात्कोशादिति हृदयाभिमन्त्रणम् । यः शतौदनामिति मितादीनां विसर्जनम् । हुतभुङ्मन्त्रेणाग्निं क्षमापयेद्विसर्जनं च । शान्त्युदकादावेवं विधिः । इति कर्मपञ्जिकायां सामान्यकर्मस्थण्डिलविधानं समाप्तम् ।

अथ पृथगर्थादिषु कर्मसु स्थण्डिलेनाज्यहोमविधिं वक्ष्यामः । अव्यसश्चेत्यादि ब्रह्म- [$Gu_2$ 46v] स्थापनान्तं पूर्ववत् । ततोऽमन्त्रकमुदपात्रं स्थापयति । ततोऽप्रच्छिन्नाग्रौ दर्भावित्याद्युत्पवनान्तं पूर्ववत्कर्म करोति । ततो विष्णोर्हस्तोऽसीत्याद्याज्यग्रहणान्तं पूर्ववत्

---

2 यत्किञ्चित् This is the last in a sequence of five mantras whose *sakalapāṭha* has been cited under the *pratīka* यन्मे अग्ने on p. 123.

---

1 उत्तरतन्त्रम् For most of the mantras and topics figuring in this paragraph and the next, cf. chapter 6.

5–6 यः शतौदनामिति मितादीनां विसर्जनम् Cf. p. 48.

9–10 अप्रच्छिन्नाग्रौ दर्भावित्याद्युत्पवनान्तं पूर्ववत्कर्म Cf. pp. 79–87.

130.10–131.1 विष्णोर्हस्तोऽसीत्याद्याज्यग्रहणान्तं पूर्ववत् Cf. pp. 89–90.

---

1 अथोत्तर॰] Ni Ku $Gu_1$, तथोत्तर॰ $Gu_2$
1 तिसृभिरग्निं] em., तिस्नरग्निं Ni $Gu_1$, तिस्रः अग्निं Ku, तिस्नरग्नि $Gu_2$
2 कृत्वा] Ni Ku $Gu_2$, om. $Gu_1$
3 पूर्ववदायुर्मा ॰॰॰ ।] Before this sentence Ku inserts: पूर्ववत्किञ्चिदित्यृचा समिधं हुत्वा । and $Gu_1$ inserts: एतास्त इति समिच्छेषं हुत्वा ।
3 ॰युर्मा विशत्विति] Ni Ku $Gu_2$, ॰युर्म आविशत्विति $Gu_1$
3 कर्म] Ni, कर्मं Ku $Gu_2$, om. $Gu_1$
3 ॰वन्दनान्तं] Ni Ku $Gu_2$, ॰बन्धनान्तं $Gu_1$
4 करोति] Ni Ku $Gu_2$, om. $Gu_1$
4 उत्तिष्ठ] Ni Ku $Gu_1$, उतिष्ठ $Gu_2$
4 ब्रह्मणस्पत इति] Ni Ku $Gu_1$, ब्रह्मणस्वते $Gu_2$
5 करोति] Ni Ku $Gu_2$, om. $Gu_1$
5–6 मितादीनां विसर्जनम्] Ni $Gu_1$, मितादिविसर्जनं Ku, मीतादिनां विसर्जयेत् $Gu_2$
6 क्षमापयेद्विसर्जनं च] corr., क्ष्स{स}मापयेद्विसर्जनं च Ni, क्षमयेद्विसर्जनं च Ku $Gu_2$, क्षमापयेदिति विसर्जनं $Gu_1$
6 ॰दकादावेवं] Ku, ॰दकावेविं Ni, ॰दकादो एवं $Gu_1$, ॰दकावेवं $Gu_2$
6–7 इति कर्मपञ्जिकायां सामान्यकर्म॰] Ni Ku $Gu_2$, इति सामान्यकर्म॰ $Gu_1$
8 अथ] Ni Ku, om. $Gu_1$, ॥ अथगर्था ॥ अथ $Gu_2$
8 स्थण्डिलेनाज्यहोमविधिं] Ni $Gu_2$, स्थण्डिले चाज्यहोमविधिं Ku, स्थण्डिले आज्यहोमो $Gu_1$
8 वक्ष्यामः] Ni, वक्षामः Ku $Gu_2$, वक्ष्यते $Gu_1$
8–9 अव्यस ॰॰॰ पूर्ववत् ।] Instead of this sentence, $Gu_1$ reads: तत्र विधिं वक्षामः । पूर्ववद्ब्रह्मस्थापनान्तं कर्म्म करोति ।
9 स्थापयति] Ni Ku $Gu_2$, स्थापयित्वा $Gu_1$
9–10 दर्भावित्याद्युत्पवनान्तं] Ku, दर्भावित्याद्युत्पनान्तं Ni, दर्भोग्रहाणाद्युत्पवनान्तं $Gu_1$, दर्भाविधायादुत्पवनान्तं $Gu_2$
10 पूर्ववत्कर्म करोति] Ni Ku $Gu_2$, कर्म $Gu_1$
10 ॰त्याद्याज्य॰] Ni Ku, ॰त्यादाज्य॰ $Gu_1$, ॰त्याज्य॰ $Gu_2$
130.10–131.1 पूर्ववत् कुर्यात्] Ni Ku $Gu_2$, कुर्यात् $Gu_1$

Gu$_1$ 45v कुर्यात् । प्रधानमन्त्रेणाज्यं जुहुयात् । ततो ये देवा अग्निं स्विष्टकृतमित्यृचाज्यं जुहुयात् । शान्तिवाचनं दक्षिणादानं च । ततो यत्किञ्चिदित्यृचाज्यं हुत्वा । एतास्त इति समिच्छेषहोमः । सहस्रशृङ्ग इत्याज्यशेषं हुत्वा । पवित्रं शतधारमिति पवित्रहोमः । तत आयुर्मा इत्यादि भस्मवन्दनान्तं कर्म कुर्यात् । स्योनं मे सीदेति स्रुवविसर्जनं कृत्वा । तत उदीराणादिकं पूर्ववत्समापयेत् ।

तथा च परिभाषायाम् ।

हिरण्यवर्णा इत्यादि कृत्वा आप्लवनादिकम् ।
Ku 45r भूमावुल्लेखनं कुर्यादग्निं तत्रोपवेशयेत् ॥
Gu$_2$ 47r, अमन्त्रकमुदपात्रं पर्युक्षणमिति स्मृतम् ।
Ni 39v असंस्कृतैर्वेष्टयेच्च कुशैरग्निं तथैकवृत् ॥
अद्भिष्ट्वापरिहीनं तज्जुहुयात्संस्कृतं घृतम् ।
स्रुवेण संस्कृतेनैव स्थण्डिले नात्र संशयः ॥
आज्यं समिध इत्यादि लिङगं समासवर्जितम् ।
दृश्यन्ते यत्र शास्त्रेऽस्मिन् तत्र तन्त्रं न कारयेदिति ॥

**इति श्रीमन्नृसिंहचरणपरिचारकश्रीमन्महोपाध्यायश्रीधरविरचितायां विवाहादिकर्मपञ्जिकायां द्विविधस्थण्डिलविधानं समाप्तम् ।**

---

1 ये देवा अग्निं] NiKuGu$_2$, ये देवाग्निं Gu$_1$
1 स्विष्टकृतमित्यृचाज्यं] Ku, स्विष्टमित्यृचाज्यं Ni, स्विष्टकृतमित्याज्यं Gu$_1$, स्वष्टकृतमित्यृचाज्यं Gu$_2$
2 यत्किञ्चिदि°] NiKuGu$_1$, यत्किश्चदि° Gu$_2$
3–7 सहस्रशृङ्ग °°° इत्यादि कृत्वा आप्लवनादिकम्] Due to eye-skip (from इत्याज्यशेषं to इत्यादि) Gu$_1$ omits all elements indicated by the ellipsis
3–4 आयुर्मा इत्यादि] Ni, आयुर्मा विशत्वित्यादि Ku, lac. Gu$_1$, आयुर्मा विश इत्यादि Gu$_2$
4 °वन्दनान्तं] NiKu, lac. Gu$_1$, °बन्धनान्तं Gu$_2$
4 कृत्वा] NiGu$_2$, करोति Ku, lac. Gu$_1$
5 °त्समापयेत्] NiGu$_2$, °त्समापयेदिति Ku, lac. Gu$_1$
7 हिरण्यवर्णा] NiKuGu$_1$, हीरण्णा Gu$_2$
8 भूमावुल्लेखनं] NiKu, भुमावुलेखनं Gu$_1$Gu$_2$
8 तत्रोप°] KuGu$_1$Gu$_2$, ततोप° Ni
10 असंस्कृतैर्वेष्ट°] Gu$_1$Gu$_2$, असंस्कृतौ वेष्ट° NiKu
11 अद्भिष्ट्वापरिहीनं तज्जुहु°] Gu$_2$, अभिष्टपरिहीनं तज्जुहु° NiGu$_1$, अद्भिष्टपरिहीनन्तंज्जुहु° Ku
13 आज्यं] NiKuGu$_1$, आज्य Gu$_2$
13 लिङगं] NiKuGu$_1$, लिङ्ग Gu$_2$
14 दृश्यन्ते] NiKuGu$_1$, तश्यन्ते Gu$_2$
14 कारयेदिति] NiGu$_1$Gu$_2$, कारयेत् दिति Ku
15–16 इति °°° समाप्तम् ।] Rather than the regular colophon, Gu$_2$ here gives it in abridged form: द्विविधस्थण्डिलविधानं समाप्तं ॥
15 श्रीमन्नृसिंह°] NiKu, श्रीमर्नृसिंह° Gu$_1$, alt. Gu$_2$
16 विवाहादि°] Ni, विवाह° Ku, om. Gu$_1$, alt. Gu$_2$

(8)

# नक्षत्रकल्पोक्ततन्त्रम्

क्षीराब्धौ शयने देवं नृसिंहं श्रीनिकेतनम् ।
नत्वा वेदव्रतादीनि वक्ष्ये नक्षत्रतन्त्रकम् ॥

अथाथर्वणां पञ्चकल्पानि भवन्ति ।

नक्षत्रकल्पो वैतानकल्पस्तृतीयः संहिताविधिः ।
चतुर्थोऽङ्गिरसां कल्पः शान्तिकल्पश्च पञ्चम इति ॥

तत्र नक्षत्रकल्पोक्तं तन्त्रं निगद्यते । अव्यसश्चेत्युक्त्वा । आप्लुत्य हिरण्यवर्णाभिरि-
$Gu_1$ 46r त्याद्यव्यसश्चान्तं कर्म कृत्वा । विशेषः पुरुषसंस्कारे धूपो देय इति । ततस्तूष्णीं ब्रह्माञ्जलिं

---

6 अव्यसश्च PS 19.35.2

---

4–5 AVPariś 49.4.7 नक्षत्रकल्पो वैतानस्तृतीयः संहिताविधिः । चतुर्थोऽङ्गिरसां कल्पः शान्तिकल्पस्तु पञ्चमः ॥ which corresponds to CVU 4.7 नक्षत्रकल्पो वैतानकल्पस्तृतीयः संहिताविधिः । चतुर्थोऽङ्गिरसां कल्पः शान्तिकल्पश्च पञ्चमः ॥, etc.
6–7 आप्लुत्य हिरण्यवर्णाभिरित्याद्यव्यसश्चान्तं कर्म Cf. pp. 50–51.

---

1 क्षीराब्धौ ] Ni, क्षीरोद्धौ $Gu_1$, क्षीरादौ Ku, क्षीराब्धै $Gu_2$
1 शयने ] $NiKuGu_1$, शयनं $Gu_2$
2 वेद° ] $NiKuGu_1$, देव° $Gu_2$
2 नक्षत्रतन्त्रकम् ] $NiKuGu_2$, तत्र तन्तकं $Gu_1$
3 भवन्ति ] $NiKuGu_2$, भवन्त $Gu_1$
5 चतुर्थोऽङ्गिरसां कल्पः ] $Gu_1$, चतुर्थो आङ्गिरसकल्पः Ni, चतुर्थोऽङ्गिरसं कल्पः Ku, चतुर्थोङ्गेरसां कल्पः $Gu_2$
5 शान्तिकल्पश्च ] $NiGu_1$, शान्तिकल्पस्तु Ku
5 पञ्चम इति ॥ ] $NiGu_1$, पञ्चमः ॥ Ku, पञ्चमेति ॥ $Gu_2$
6–7 °रित्याद्य° ] NiKu, °रित्याद° $Gu_1Gu_2$
7 देय इति ] $NiGu_1$, देय ति Ku, वेयेति $Gu_2$
7 ततस्तूष्णीं ] $NiKuGu_1$, तत तूष्णीं $Gu_2$

करोति पूर्ववत् । सह नाववत्वित्यृग्भ्यां देवानुपतिष्ठते । मन्त्रो यथा ।

सह नाववतु । सह नौ भुनक्तु । सह नौ वीर्यं तदस्तु ब्रह्म । Gu₂ 47v
इन्द्रोऽपि तद्वेद मा विद्विषावहै । ब्रह्मापि तद्वेद मा विद्विषावहै । Ku 45v
सत्यं वदामि । सत्यं वदिष्यामि ।
तन्मावतु । तद्वक्तारमवतु ।
तन्मामवतु । तद्वक्तारमवतु ।
अवतु मामवतु वक्तारम् ।

ततः प्रादेशमात्रा वेद्यामिन्द्रः सीतेत्याद्यद्भिष्ट्वान्तं कर्म कृत्वा महाव्याहृत्यादिभिः समिधो हुत्वा । सुगार्हपत्य इत्यादि पञ्च समिधः सकृदग्नौ हुत्वा । समिद्धोऽग्निरित्यृचा सु- Ni 40r
